भारतवीररत्नमालाया द्वितीयं रत्नम् ।

गोब्राम्हणप्रतिपालक-

छत्रपति-

श्रीशिवाजिमहाराजचरितम्

लेखकः

हसूरकरोपाह्वः श्रीपादशास्त्री
(न्यायतीर्थः, वेदान्ततीर्थः, मीमांसातीर्थः, सांख्यसागरश्च)

———:o:———

एतच्च

इन्दूरनगरे

'मालवा स्टेशनरी अँड प्रिंटिंग वर्क्स' नाम्नि मुद्रणालये

तदध्यक्षेण प्रकाशकस्य कृते मुद्रापितम्.

———

(अस्य पुनर्मुद्रणे सर्वथा प्रकाशकस्यैवाधिकारः)

———

मूल्यम्-पादोनं रूप्यकद्वयम् (१॥)

(प्रेषणव्ययःपृथक्)

Publisher—Shripad Vaman Hasurkar,
Imalibazar, No. 30 Indore city. C. I.

Printers—The Malwa Stationery & Printing
Works, Ltd. Indore. C. I.

प्रस्तावना.

अयि भारतवासिनः ! मम प्रियबान्धवाः ! इदं खलु तत्रभवतो निखिलभूमण्डलविख्यातस्य, परद्रव्यपरकान्तानिस्पृहस्य, सनातनधर्मरक्षणबद्धकंकणस्य, स्वमातृभूमिस्वातंत्र्यपालनाध्वरदीक्षितस्य दुर्मदोन्मत्तयवनोद्वेजितानां गवां तथाऽऽर्यसुन्दरीणां शरणस्य, यवनराज्यधूमकेतोः, अपारशौर्याकरस्य, छत्रपतिपदवीभूषणस्य, महाराष्ट्रमहीसौभाग्यतिलकस्य, भोसलेकुलसुधांशोः, श्रीशिवराजस्य पावनं व्यवहारादर्शभूतं चरितामृतं भवतां देशबांधवानां पवित्रेषु हस्तकमलेषु निदधतो मे मानसं कामप्येकामानन्दस्य परां काष्ठां भजते. धन्यः स कालो यत्र महाराष्ट्रस्वातंत्र्यरक्षणार्थं साक्षाच्छंकर एव शिवराजरूपेणावतत्तार. महाभागाः ? अथ्च सत्याः सकललोकमान्याया मातुर्जिजादेव्या जनित्वा परमनिस्पृहाणां श्रीरामदासस्वामिनामनुग्रहपात्रमभूत्. दुःसहेन यवनाग्निना निर्दग्धकल्पानि महाराष्ट्रस्थानि क्षत्रियकुलकमलानि स्वप्रतापेन प्राकाशयत्. येन परमबलाढ्योऽपि विजापुराधीशो लीलयैव पराजितः, कपटी दिल्लीश्वरः स्वबुद्धिवैभवेन विस्मापितः, सर्वानपि बलाढ्यानाक्रान्तसमग्रभारतवर्षान् यवनाधीशा-

न्विजित्य महाराष्ट्रभूः स्वातंत्र्यसौभाग्यालंकृता कृता, तस्य जनकस्यैव महात्मनः शिवराजस्य प्रतापम् वर्णयितुं कथं मादृशो मानवः शक्नुयात् ? तथापि शिवराजस्य लोकोत्तरं चातुर्यं तथा मातृभक्तिं तथा दीनदयालुतां निरीक्ष्य विस्मितस्तदीयं चरितं वर्णयितुं संकल्पमकरवम्. संप्रति प्रायः सर्वेषामेव भारतवासिनां संकल्पा उत्पद्यन्ते विलीयन्ते नतु सफला भवति तथापि भगवता मदीयः संकल्पः सफलीकृत इति तं त्रैलोक्यनाथं नमस्कारैः संभाव्य गुणदोषविवेकचतुरान् पाठकान् गुणग्रहणाय विज्ञप्य विरमामि.

विदुषांवशंवदः

श्रीपादशास्त्री.

मुख्यविषयानुक्रमः

१	पूर्वप्रसंगः	१—१४
२	कुलवृत्तम्.	१५—३०
३	पितृचरितम्.	३१—३९
४	शिवराजजन्म, बाल्यंच.	४०—५३
५	शिक्षणम्.	५४—६६
६	स्वराज्यस्थापनाकारणानि.	६७—७५
७	सहायलाभः.	७६—८१
८	स्वराज्यस्थापनारंभः.	८२—९१
९	पितृसंकटवारणम्.	९२—१०६
१०	विजापुराधिपेन समं संग्रामाः... ...	१०७—१३४
११	नौकाबलं समुद्रस्वामित्वं च.	१३५—१३९
१२	दिल्लीपतिना समं वैरोद्भवः संग्रामाश्च. ...	१४०—१५७
१३	दिल्लीनगरगमनं तत्र कारागारवासः. ...	१५८—१६८
१४	युक्त्या ततोनिवृत्तिः स्वदेशागमनं च. ...	१६९—१७८
१५	राज्याभिषेकोराज्यव्यवस्था च. ...	१७९—१९०
१६	कर्णाटकाक्रमणम्.	१९१—१९९
१७	सज्जनसमागमः.	२००—२०५
१८	उपसंहारः.	२०६—२१५



१ पूर्वप्रसंगः.

१ महाराष्ट्रदेशपरिचयः

२ यवनानां दक्षिणापथे प्रवेशः

३ बहामनीराज्यं तदीया विभागाः

४ यवनानामधिशासने कृत्स्नस्य भारतस्य स्थितिः

अस्ति समस्ते भारतवर्षे विख्यातः, सर्वतः परमविस्तीर्णैः परमप्रचण्डपाषाणावलिसंकटितैरतिविशालघनवृक्षराजिसमाच्छादितैः क्रूरव्याघ्रादिपशुनिवासीभूतैः सह्याचलस्य पादैर्व्याप्तः, स्थाने स्थाने विराजमानैः स्वातंत्र्यनिधिरक्षकैरिव परकीययवनादिरिपुगणास्पृष्टैः सफलसाधनसम्पन्नैर्नगरैरिव दुर्गैर्मनोहरः, चतुरकृषीवलसंस्कृतैर्नानाधान्यांकुरभूषितैः क्वचिद्धरितैः क्वचिद्रक्तैः क्वचित्पीतैः स्थलाविभागैरतिसुन्दरः, स्वपावित्र्यनाशभिया यवनाक्रान्तादार्यावर्तात्समागतैरिव

विख्यातपावित्र्यैर्नानातीर्थस्थलैः पावितः, भागीरथीभगिन्येव वा हिमाचलशृंखलयेव सह्याचलमार्गतया भागीरथ्येव वा परमपवित्रसलिलया उभयकूलविराजमानधान्यांकुरमण्डितक्षेत्रजातप्रतिबिंबविचित्रया कृष्णानद्या समलंकृतः, प्रतिपदविराजमानैरितिहासप्रसिद्धैः स्थलैः प्राप्तगौरवो महाराष्ट्रनामा महान् देशो दक्षिणापथे.

यश्च—सकलेष्वपि भारतप्रदेशेषु यवनाक्रान्तेषु, सर्वेषु च भारतवासिषु दुर्दैवबलपांडितेषु, भगवत्या अनाथायाः कामधेन्व इव स्वातंत्र्यदेव्याश्चिरं निर्भयनिवासस्थानतां प्राप.

यं च—सर्वधर्मोपकारक ऐहिकामुष्मिकसुखदायी सर्वत्र सर्वैर्गं संमानितः. सनातनधर्मः प्रबलैर्यवनैराक्रान्तः स्वरक्षणार्थं सर्वं गत्वाऽकृतार्थः शरणीकृत्याऽऽत्मानं रक्षति.

यं च—समाक्रान्तसकलभारतवर्षां पवित्रभारतमहिलापातिव्रत हारिणीं दुर्बालस्त्र्यंधकारिणीं सात्त्विकविप्रगणत्रासदायिनीं यवनवात वलात्प्रसिद्धा दक्षिणापथस्थार्यावर्तमिव जातिचक्राम.

यस्मैच—येन स्वकुलपावित्र्यं, स्वातंत्र्यं, सदाचारः, दीर्घोद्योगित्वं, कुशाग्रबुद्धित्वं, क्षमाऽनुकरणता, जितेंद्रियत्वं शौर्यं च.

यस्माच्च—तानाजिमालुसरे, बाजीप्रभुदेशपांडे, प्रभृतयोऽपारशौर्यशालिनः, जीवाजीविश्वासराव, हिरोजीफर्जंद, संभाजीकविकलश, प्रमुखाः स्वा

भक्ता मातृभूमेर्निष्कामसेवकाः समुत्पन्ना इदं जगत् स्वर्गादपि श्रेष्ठमकार्षुः

यस्य च–कीर्तिं प्रतिपदं विराजमानानि श्रीशिवराजस्य तथा तदीयानां नररत्नानां पराक्रमैः परिभूषितानि नानास्थलानि समग्रे भूमण्डले विस्तृतां पुनरपि विस्तारयन्ति.

यस्मिंश्च परमशूरपुरुषजन्मदायिभ्यो महाकुलेभ्यः संभूतै राजनीतिचतुरैः पार्थिवरत्नैः शासितानि. स्वतंत्राणि. सर्वाधिकार-सम्पन्नानि, कोल्हापुर,सांगली,मिरज,जमखिंडी,सुधाळ,प्रभृतीनि राज्यानि प्राचीनमहाराष्ट्रवैभवं सर्वान् स्मारयितुमिव भगवता रक्षितानि विराजन्ते.

तस्मिन्नस्मिन सकलसौख्याकरे समशीतोष्णे महाराष्ट्रदेशे आर्याणामागमनात्पूर्वं अनार्यशब्दवाच्या भिन्ना मानवजातयो न्यवसन. ता अपि यदोत्तरध्रुवनिवासिन आर्या आर्यावर्तमाक्रम्य तास्ततो निर्वासयामासुस्तदैवागत्याऽत्र निवासार्थमागच्छन. तेन तदागमनात्पूर्वं कृत्स्नोऽपि महाराष्ट्रदेशो रिक्तएवासीत्. अनार्यास्तु स्वनिवासादार्यावर्तान्निर्वासिता इमं देशं प्राप्य प्रबलानि राज्यानि विरचयामासुः.

अथ यदाऽऽर्या भारतवर्षं प्रविश्य कृत्स्नमपि आर्यावर्तं स्वायत्तीकृत्य तत्र सर्वं व्यवस्थाप्य स्वास्थ्यमलभन्त, तदा ते दाक्षिणापथे

विराजमानानि महाराष्ट्रदेशवर्तीनि अनार्यराज्यानि जेतुं मतिमकुर्वन्. महता साहसेन नर्मदां समुल्लंघ्य विंध्याचलमध्यगामिना मार्गेण महाराष्ट्रं प्रविश्य क्रमेण तत्रत्यानि राज्यानि स्वायत्तानि कुर्वाणास्ते आर्याः सकलमपि दक्षिणापथमाक्रम्यानार्यान् दासांश्चक्रुः. तेऽपि कालप्राप्तां दुर्दशां स्वीकृत्य तेषां दास्यं च प्रायो दक्षिणापथ एव स्थित्वा स्वजीवनमयापयन्.

एवं समग्रस्य भारतवर्षस्य स्वामित्वं लब्ध्वा ते आर्याः स्वराज्यव्यवस्थां कुर्वाणाः प्रथमतः स्वकर्माणि चतुर्धा व्यभजन्त. तानि च शिक्षणशासनवाणिज्यसेवाभेदेन भिन्नानि सकललोकशास्त्रप्रसिद्धान्येव. तदर्थं च ते स्वीयेभ्य एव कांश्चित्तैलप्रज्ञान् जनान् विशिष्य शिक्षार्थे न्ययुंजत. एवमेव तत्तत्कर्मयोग्यानन्यानपि. तेऽपि यथारुचि कर्म लब्ध्वा महता मोदेन तथोत्साहेन स्वकर्मणस्तादृशमुत्कर्षं चक्रुर्यथा सर्वेऽपि जगतीतलवासिनस्तदानींतनाः पुरुषाः परं व्यस्मयन्त. अद्यापि हि प्राचीना इतिहासविदस्तं विभज्यकर्मकारिणामार्याणामुत्कर्षं प्रतिपादयन्ति. विचारशीलास्तामेव समाजव्यवस्थां कामयन्ते.

एवंक्रमेण लौकिकसुखस्य परां काष्ठामारूढेषु सकलेष्वपि आर्येषु ते व्यवहारार्थं तथा कार्यस्य सौकर्यार्थं च कल्पिताश्चत्वारो विभागाः सकलोत्कर्षकारणं परस्परैक्यं विस्मृत्य प्रत्येकं भिन्नानमन्यन्त. यथा हि प्रथमं ब्राह्मणाः क्षत्रियादीनधस्तनान् वर्णान् क्वाऽपि विपत्त्या पीडितानवलोक्य तत्साहाय्यं शीघ्रमकार्षुस्तथा तदीया वंशजा

नाकुर्वन्. स्वीयं कर्म शिक्षणं तथा दानप्रतिग्रहादिकमेव मन्यमाना इतरेषु त्रिषु संपन्नेषु विपन्नेषु वौदासीन्येनावर्तन्त. इमां च वृत्तिं क्रमेणाग्रिमाअपि वर्णाः स्वीचक्रुः. तेन कृत्स्नोऽपि समाजः शिथिलावयवः शकट इव स्वकर्मणि अशक्तोऽभूत्.

किंच–रजोगुणप्रधाना क्षत्रियजातिः सर्वत्र स्वास्थ्यं लब्ध्वा जेतव्याभावात् सालसा विलाससक्ता बभूव. केचन परस्परं कलहायमानाः स्वकीयानामेव राज्यान्याक्रम्य स्वकीयानेव जघ्नुः. तेन क्षात्रियेष्वेव परस्परं द्वेषो बद्धमूलोऽभवत्. वान्धवाः ! इमे यवनादयः परकीया महोः कालादत्र व्यवहारमिषेण समागच्छन्, परन्तु आर्याणां दुर्धर्षेण तेजसा प्रतिहतास्तूष्णीमतिष्ठन्. यदा तु ते क्रमेण शिथिलीभूतं परस्परैक्यं सर्वोत्कर्षकारणमार्याणामपश्यंस्तदारभ्य मृत्युलोकवासिनीं कामधेनुमिवेमां भारतभुवं जेतुं प्रायतन्त. भारतवर्षादुत्तरेण क्रमेण प्रबलीभवन्तो यवना भारतवासिनां चतुर्णामपि वर्णानां परस्परवैमत्यं सर्वनाशकारणं सम्यगवगम्य भारतं जेतुं कृतनिश्चयास्ते प्रथमतः सिंधुनदमवतीर्य तत्रस्थं दाहीरनामानं क्षत्रियराजं पराजयन्त. समरशायिनस्तस्य कन्याश्च दासीर्व्यधुः. सर्वान् देवालयान् भूमिसाच्चक्रुः. ब्राह्मणांश्च बलादेव महंमदीयान. एनं विजयं लब्ध्वा प्राप्तविश्वासास्ते यवनाः क्रमेणाग्रे स्वपादान् प्रासारयन्. इमां नूतनां विपदं परिहर्तुं केचन तदानींतनाः क्षत्रियभूपालाः प्रायतन्त, परन्तु तादृशैक्याभावाद्वा प्राथमिकतेजोनाशाद्वा न ते यशस्विनोऽभवन्. प्रत्युत सयवनगीन महंमदगिझनीप्रभृतिभिर्यवनाधिपैर्भूयोभूयः समाक्रम्य लुण्ठित-

सर्वम्वेयं भारतभूः कपर्दिकावशेषाऽपि नाभवत्. अगणितान जनान्निहत्य तदीयै रक्तैश्च सिक्ता न नयनयोः संतोषमकरोत्.

वाचकाः ! जीवत्सु बलाढ्येषु तेषु क्षत्रियराजेषु अकस्मादनाथस्येव भारतस्य लुण्ठनं यवनैः कृतमिति विचित्रं विस्मयकरमिवाभाति, तथापि ये खलु विचारशीला न ते विस्मयन्ते ! बलाढ्योऽपि महानपि तूलसंघः सूक्ष्मेणाऽपि दृढेन वातेन विधूयते न वा ! स्थाने स्थाने विदीर्णो नानाछिद्रान्वितो महानपि पर्वतः स्वल्पेनाऽपि निर्झरणान्तः प्रविश्य चूर्णीक्रियते न वा ? तथैव बलाढ्याअपि क्षत्रिया अन्यैरुदासीनैः कचिच्च वद्धद्वेषैर्भारतवासिभिरकृतसहायाः संहतैर्यवनैः पराजिताः. न केवलं क्षत्रियाणामेवेपा दुर्गतिः किंतु सर्वेषामपि त्रैवर्णिकानां. बान्धवाः ? न खलु केवलमन्ये त्रैवर्णिका एव क्षत्रियानद्विषन नासाहाय्ययन किंतु क्षत्रियभूपाला अपि परस्परं बध्दद्वेषाः स्ववैरनिर्यातनार्थं यवनान् स्वसाहाय्यार्थमाव्हयन. एवंस्थिते परस्परद्वेषभिन्नानां क्षत्रियाणां विजयः कथं स्यात् ? सज्जनाः ? यवनानां समये भारतवासिनः क्षत्रियभूपालाः कथं परस्परमद्विषन्निति दर्शयितुमहं कांश्चिदवृत्तान्तानितिहासप्रमाणान् लिखामि.

यदा चायं महंमदघोरीनामा यवनराजो भारतमाचक्राम तदा दिल्लीनगरे क्षत्रियकुलावतंसः पृथ्वीराजो राज्यमकरोत्. तस्मिन्नेव समये गुर्जरदेशे भोळाभीमदेवनामाऽन्यः क्षत्रियश्रेष्ठ एव स्वराज्यं न्यायेन प्रशशास. स चाबूदुर्गे राज्यकारिणः परमारराजस्य इच्छिनीकुमारीं नाम कन्यां बलादेवायाचत. अबूनरपतिस्तु तां याचनां तिरस्कृत्य

योध्दुकामः स्वसाहाय्यार्थं पृथ्वीराजमाव्हयत्. पृथ्वीराजोऽपि गुर्जरपतिना समं वद्धवैरः 'अयमेव समयो वैरनिर्यातनस्य' इति मन्यमानस्तस्य साहाय्याय स्वयमागच्छत्. संवृत्ते च संग्रामे गुर्जराधिपं पराजित्य परमारकुमारीं परिणीय पृथ्वीराजः स्वराजधानीमाजगाम.

एवंविधैकदा कनोजाधिपतिना राजसूययज्ञः प्रारब्धः. तत्रामंत्रितोऽपि पृथ्वीराजो न जगाम. तस्य च कनोजाधिपस्य कन्या संयोगिता पृथ्वीराजं मनसा वव्रे. राजसूययज्ञनाशेन तथाऽन्यैश्च कारणैः पृथ्वीराजेन समं वद्धवैरः कनोजाधिपतिर्न तामभिननन्द किंतु कारागारे स्थापयामास. पृथ्वीराजश्च तां युक्त्या कारागारान्मोचयित्वा निभृतं परिणीय तया सह स्वराजधानीमायथौ. कनोजाधिपश्च तद्वृत्तमाकर्ण्य क्रुद्धः पृथ्वीराजमाक्रम्ययुध्यत परन्तु न लेभे यशः. तथापि कालसर्प इव तं द्विपन् यदा महंमदघोरीनामानं यवनाधिपं पृथ्वीराजाक्रमणाय समागच्छन्तं शुश्राव तदा तस्य सहायो भूत्वा पृथ्वीराजं नाशेषमकरोत्. स तु यवनाधिपः शीघ्रमेव तस्मै यमलोकप्रेषणरूपं पारितोषिकं वितताम. वाचकाः! कतिप्रसंगान्वंविधान् दर्शयामि. सर्वथा भारतस्य पारतंत्र्ये तन्निवासिनां परस्परद्वेष एव कारणमिति तु निर्विवादम्. अस्तु. एवंक्रमेण कृत्स्नमपि आर्यावर्तं जित्वा ते यवनाः स्वराजधानीं दिल्लीनगरं विधाय सर्वान् देशिकान् स्वाधीनानकुर्वन्.

अथ क्रमेण महंमदीयाः स्वस्वनिवासस्थानेभ्यः समागताः स्वकीयानेव दुर्बलान्नृपान्निहत्य स्वयमेव राज्याधिपा अभवन्. वाचकाः!

यदा हि यवनानामितिहासं वाचकः पठति तदा रात्रिंदिवं परद्रव्यस्य तथा परजायायाश्चापहारार्थं ते कीदृशानि कर्माणि चक्रुरिति चित्ते कुर्वाणः स विस्मयसागरे निमज्जति. गुलाम,खिलजी,तखलख,-मोंगलाभिधाना यवनवंशा बलोन्मत्ताः पूर्वं दुर्बलमघ्नन्. यदा च खिलजीकुलसंभवो जलालुद्दीननामा यवनाधिपो दिल्लीश्वरोऽभवत्तदा तस्य भ्रातुष्पुत्रोऽल्लाउद्दीनो योद्धुकाम आर्यावर्ते जेतव्याभावं पश्यन् दक्षिणापथे आर्यावर्तसमागतैः क्षत्रियैः स्थापितानि राज्यानि जेतुमाचकांक्ष. स तु महत्या त्वरया गुर्जरदेशं प्राविश्य तदधिपं कर्णराथं विजित्य तद्भार्यामात्मपर्त्नीं व्यधत्त. ततो देवगिरिं गत्वा तदधिपं रामरायं विजित्य स्वसामन्तमकरोत्. महाभागाः! अयमेव पराक्रमी अल्लाउद्दीन इत्थं दक्षिणापथविजययशो लब्ध्वा निवृत्तः स्वपितृव्यस्य दर्शनायागच्छत्. तत्र च महता प्रेम्णा सत्कृत्य कुशलमापृच्छन्तं तमेव पितृव्यं पूर्वं संकेतितैः शस्त्रोपर्जाविभिर्निहत्य स्वयं दिल्लीश्वरोऽभवत्. वाचकाः! पश्यत राज्यलालसायाः स्वरूपं. यो हि जलालुद्दीनः स्वभ्रातुष्पुत्रं विजयिनं सत्कर्तुमागतः स एव तेन निहतः! अस्तु. अयमेव दक्षिणापथविजयी प्रथमो यवन इति वाचकैरवधारणीयं.

यदा चायं प्रबलो यवनो दक्षिणापथं जेतुं समागच्छत्तदा दक्षिणापथे यानि स्वर्मीचीनानि राज्यानि व्यराजन्, तानि केवलमैतिहासिकवृत्तज्ञानार्थमिह संक्षेपेण लिखामि. तदानीं महाराष्ट्रे यादवकुलसंभूता देवगिरिराजधानीका राजानो राज्यमकुर्वन्. तैलंगदेशे वरंगुळराजधान्यां नरपतिनामानो नृपा आसन्. द्राविडदेशे मदुराराजधानीकाः

पाण्ड्यकुलसंभवा भूपाला भुवमपालयन्. तत्रैव कांचीवरंराजधानीकाः चोलान्वयसभवा राजानो व्यराजन्. अन्ये च स्थाने स्थाने पराक्रमशालिनो भूपाला यथाशक्ति दक्षिणापथमहीमपालयन्, परन्तु उपरिनिवेदितो यवनो यदा दक्षिणापथं जेतुमायातौ तदा महता गजेन सभा इवसे सर्वेऽपि राजानः क्षणादिवानलयन्. अथाचलाद्दीनः क्रमेण रामेश्वरपर्यन्तं कृत्स्नं दक्षिणापथं निर्जित्य रामेश्वरक्षेत्रे एकं स्वधर्मस्योपासनामन्दिरं विधायापारधनराशिभिः समं स्वराजधानीमाजगाम.

(३)

एवं क्रमेण कृत्स्नं दक्षिणापथं निर्जित्य दिवंगतेऽलाउद्दीने तदीया वंशजाः कतिपये दिल्लीश्वरा अभवन्. ततश्च चरमं खिलजीवंशसंभूतं दिल्लीश्वरं निहत्य महंमदतग्वलग्थनामा यवनो यदा दिल्लीश्वरो बभूव तदा दिल्लीनगरे गंगुनामा कश्चन विप्रवरो न्यवसत्. तस्य संनिधौ हसननामा यवनदास आसीत्. एकदा स हलेन क्षेत्रं कर्षन भूमौ सुवर्णपरिपूर्णमेकं भाण्डं लेभे. तच्च भाण्डं स्वस्वामिने सर्वं वृत्तं निवेद्य समर्पयत्. स च तत्स्वामी तस्य प्रामाणिकतामवलोक्य सन्तुष्टस्तं दास्यान्मोचयित्वा दिल्लीश्वरस्य सेवायां न्ययोजयत्. वाचकाः ? अयमेव प्रसिद्धस्य बहामनीसंज्ञकस्य दक्षिणापथीययवनराज्यस्य प्रथमः संस्थापकः. अस्तु. यतोऽयं हसनो दिल्लीश्वरस्य कृपां संपाद्य दक्षिणापथे तेन नियुक्तः सम्यक् राज्यकार्यमक-

रोत्. अचिरादेव गुर्जरप्रान्ताध्यक्षो राजद्रोही नाम भूत्वा स्वतंत्रो भवितुमियेष. तं च दक्षिणापथनियुक्तो राजप्रतिनिधिरसाहाय्ययत्. तं तु गुर्जरप्रान्ताध्यक्षं शासितुं स्वयं दिल्लीश्वरो महता सैन्येन समं गुर्जरदेशमागत्य लब्धयशास्तस्य साहाय्ययितारं दक्षिणापथाधिकारिणं शासितुं महाराष्ट्रमाययौ. अथान्तरं दिल्लीप्रान्ते किंचित्संकटमुदभूत्. तस्य निवारणार्थं तं प्रदेशं जिगमिषुः स स्वद्रोहिणो दक्षिणापथस्थकस्य शासनकर्मणि एनं इरलनामानं यवनं नियुज्य 'जाफरखान' पदव्या समलंचकार. ततश्च स्वदेशं गते दिल्लीश्वरे शत्रुभिर्मूलयित्वाऽत्मानं च 'अलाउद्दीनहसन' नाम्ना विख्यापयन् कृत्स्नस्य दक्षिणापथस्य स्वामिनं व्यधात्. क्रमेण तैलंगणगोंडवनादिविभागाध्यक्षैः समं युद्धानि विधाय सकलमेव दक्षिणापथमनुशशास.

वाचकाः ! एवंविधेन संस्थापितेऽस्मिन् बहामनीराज्ये बहवो यवनराजा अभवन्. यदा चास्मिन् महति राज्ये ये खलु शासनार्थं राज्ञा नियुक्तास्तद्विभागाध्यक्षास्त एव राजानं व्यसनासक्तं वीक्ष्य निर्भया अभवंस्तदा कृत्स्नमिदं राज्यमनश्यत्. नष्टस्यास्य महाराज्यस्य पंच विभागा अभवन्. ते च नामतो यथा—

विजापुरस्थः—आदिलशाहीनामकः

गोवळकोंडेस्थः—कुतुबशाहीनामकः

बऱ्हाडस्थः—इमादशाहीनामकः

अहमदनगरस्थः—निजामशाहीनामकः

अहमदाबादस्थः—बेरीदशाहीनामकः

तत्रान्तिमास्त्रयो विभागा दिल्लीश्वरैर्युता वा स्वराज्यान्तर्गताः कृताः. प्राथमिकौ द्वौ तु यदाऽस्मच्चरित्रनायकोऽवततार तदा सम्यगास्ताम्. वाचकाः! एतावत्कालं योऽयं मया यवनानामितिहासो लिखितस्तस्येदमेव प्रयोजनं यदाभ्रिमं चरित्रनायकस्य वृत्तं सम्यक् ज्ञातं यथा भवेत्.

[४]

यदाप्रभृति कृत्स्नमिदं भारतवर्षं यवनैराक्रान्तं तदारभ्येदं मदमत्तगजेन विध्वस्तलताविशेषमुपवनमिव दुर्दशमभूदिति सर्वेषामितिहासविदां मतम्. प्रायः सर्वे एव यवनराजा यं भारतप्रदेशमजयंस्तत्रत्यान ब्राह्मणांस्त बलात्कारेण यवनानकार्षुः. आर्याणां सुन्दराणि देवालयानि ध्वंसयामासुः. याश्च ब्राह्मणानां वेतरेषां वा परिणीता वाऽपरिणीता वा कन्या अरक्षता बलादवाहृत्य स्वभोग्या व्यधुः. तासां भर्तॄनथवा पितॄन् शूलावतंसांश्चक्रुः. सपरिश्रमं ब्राह्मणैर्लिखितान् ग्रंथानग्नौ चिक्षिपुः. आर्यदेवतानां मूर्तीः शकलीकृत्य तानि शकलानि स्वोपासनामंदिराणां सोपानेषु नियोजयामासुः. नतावदेव किंतु अगृहीतयवनधर्माणामार्याणामुपरि नूतनं करं स्थापयामासुः. तेन प्रायः सर्वत्रैवास्वास्थ्यमासीत्. वाचकाः! यद्यपि यदा बलवता केनचिद्दुर्बलं राष्ट्रं विजीयत तदा तत्रत्या प्रधानीभूता राजसत्ता नश्यति, तथापि तादृशराजसत्तास्थापकानि मूलकारणानि न नश्यन्ति. तस्माद्ये बाहुबलमतिमन्तो जेतारस्ते जितं नूतनं राज्यं शनैःशनैर्युक्तिभिरात्मन-

श्यतां नयन्ति न बलात्कारेण. बलात्कृताश्च जिताश्चापि जना दुर्मनायन्ते. प्रजाप्रसादमूलिका हि राजसत्तेति सर्वेषां मतं. एषैव राजनीतिः. सा तु यवनेषु अंशतोऽपि नासीत्. ते केवलं खड्गबलेनैव राज्यशासनमजानन्. तेन प्रतिवर्षं सहस्रशो राजद्रोहिणः प्रादुरभवन्. प्रजाजनाअपि दुर्बलं स्वाधिपं वीक्ष्य तदीयत्रासादात्मानं मोचयितुं प्रायतन्त. ततो भारते स्वास्थ्यस्य नामापि नाश्रूयत.

किंच—यथा हि सकलो जनः स्वाभीष्टं धनादिकं मन्यते तथैव स्वकलत्रपुत्रादीन्. एवंस्थिते भारतं विजित्यात्रत्याः सुस्वरूपा महिला दासीः कर्तुं प्रयतमाना यवनाः सर्वानपि भारतवासिनोऽपारदुःखसागरमग्नानकार्षुः. न केवलं साधारणाः सैका यवना इत्थं चक्रुः, किंतु पञ्चारापरावरकर्णेऽपि दिल्लीश्वराअपि निपुणा एवासन्. परेषां जायापहरणार्थं ते सहस्रशो युद्धानि व्यधुः. प्रसिद्धो दिल्लीश्वरोऽल्लाउद्दीनः चितोडदुर्गाधिपस्य महाराजलक्ष्मणसिंहस्य पितृव्यपत्नीं पद्मिनीं लावण्यवतीं निशम्य तां कामयमानो घोरं युद्धं विधाय स्वकीयान् सैनिकांस्तथा परानपि अगणितान् समरदावानले जुहाव. अन्ते तामपि महाभाग्यां सतीं पद्मिनीं वन्हौ शलभायितां नालभतैव. सज्जनाः! सर्वस्मिन्नसारे संसारे सारं कौटुम्बिकं सुखं. तत्र च गृहिण्येव मुख्य कारणं. तस्या एवापहारे निराशो मनुष्यः किं किं न कुर्यात्!


अपिच—यथाहि संसारे मानवा लौकिकं सुखं कामयन्ते तथैव मानमपि. यदि ते मानं न कामयेरंस्तदा लौकिकं सुखं प्रभूतं

लब्ध्वाऽपि न ते पशुभ्योऽतिरिच्येरन्. लौकिकं हि सुखमाहारनिद्राभय-मैथुनजन्यं पशवोऽपि लभन्त एव. धर्मभत्न्यपहारतो नापमानः कश्चनान्योऽधिको भवितुमर्हति. आर्याश्च यद्यपि यवनैर्जिताऽस्तथापि संस्कृत्या ते ततो निःसंशयं श्रेष्ठा एव. तत इमां यवनानां पशुरीतिमवेक्ष्य सतप्ता एकीभूय तन्नाशार्थं प्रायतन्त.

अपरंच–मानवा लौकिकं सुखं कामयमाना यथा स्वकुटुंबरक्षणाय प्रयतन्ते तथैव स्वधर्मस्य. धर्मो नाम समाजसौख्याय प्राङ्निर्विहिता नियमाः. आर्याणां च मूर्तिपूजा धर्मत्वेनाभिमता. तदर्थं च ते महताऽऽदरेण स्थाने स्थानेऽनेकानि अलौकिकशिल्पचातुर्यघोषकानि देवालयानि व्यरचयन्. यवनास्तु तानि विनाश्य देवप्रतिमाश्चिरं स्वोपासनामंदिराणां सोपानततिं निर्ममुः. वाचकाः ? यथा हि स्वकीयो धर्मः स्वस्य प्रियस्तथैव परकीयः परेषामिति न तेऽजानन्. तत्रापि संतप्ता आर्या यवनराज्यनाशमैच्छन्.

अन्यच्च–ये खलु विद्वांसो बुद्धिमन्तस्त एवाज्ञानां धौरेया भवन्तीति सार्वजनीनं. आर्याणां धौरेया ब्राह्मणा एवासन्. यवनाश्चैतान् स्वधर्मत्यागाय वा मरणाय वा वदन्तोऽकोपयन्. तथा गवां घातेनाऽपि सर्वानुद्वेजयामासुः. तेन मानिनो बलिष्ठा स्वीकृतयवनसेवा-अपि क्षत्रिया दुर्मनायमानाः स्वातंत्र्यलाभाय प्रायतन्त. एवं समुत्सुके-

पु क्षत्रियकुलेषु ब्राह्मणाअपि गृहीतभिन्नभिन्नवेषा उपासनोपदेशद्वारा सर्वेभ्यो भारतस्थेभ्यां दुरवस्थां निवेद्योत्तेजयामासुः. एवंरीत्या यवन-संतापितानां सर्वेषां भारतवासिनां स्वातंत्र्यलाभेच्छा कथं महाराष्ट्रे फलवत्यभूदिति वयं क्रमेण निरूपयिष्यामः.





१ यवनानां त्रायाद्दक्षिणपथमागताः क्षत्रियशाखाः

२ राजस्थानक्षत्रियवृत्तम्.

३ भोसलकुलोत्पन्नानां पञ्चपुरुषाणां संक्षेपेण वृत्तम्.

४ पितामहस्य मालाजिराजस्य चरित्तरं वर्णनम्.

[१]

वाचकाः ! निरूपितो मया यथामति पूर्वप्रसंगः. यद्यप्यधुना चरित्रनायकस्य वृत्तं निरूपयितुं योग्यं तथापि शिवनृपतेः कुलवृत्तज्ञानार्थमन्येषां दक्षिणापथवासिनां तत्सजातीयानां कुलवृत्तनिरूपणमावश्यकमिति तदेवादौ निरूपयामि.

यदाऽऽर्यावर्ते यवना बलिष्ठा भूयांसश्चाभवंस्तदा बहव आर्यवंशजा क्षत्रिया नूतनानि राज्यानि स्थापयितुं दक्षिणापथमागच्छन्निति मया पूर्वमेव कथितं. तथैव दक्षिणापथे तैः स्थापितानि राज्यानि पुनरपि मदोन्मत्ता यवना अजयन्नित्यपि. तत्र दक्षिणापथे स्थापितानां

भिन्नानां राज्यानां नाशे त एव क्षत्रियकुलसंभूताः श्रेष्ठा आर्या गत्यन्तराभावात् कथमपि तेषु तेषु यवनराज्येषु योगक्षेमार्थं कांश्चिदधिकारान् संपाद्य तानेव यवनानसेवन्त. शूरोभूयस्तैस्तैर्यवनराजैरपगानिताअपि तादृशोत्साहाभावाद्वा तादृशैकनासत्वाद्वाऽनुकूलं समयमपश्यन्तः कथमपि संसारयात्रां यापयामासुः. अग्रे च तदीया वंशजाः क्रमेण भिन्नेषु यवनराज्येषु लब्धाधिकारास्तानेव स्वपालकान् मन्यमाना विस्मृतस्वस्वरूपा लुप्तसंस्कारा अनार्यैः कृतसंबंधाः शूद्रतामभजन्त.

किंच—यवनत्रासाद्याः खलु दाक्षिणापथं क्षात्रियशाखाः समागच्छंस्ताअपि यवनैर्जिताः कालप्रभावात् स्वास्तित्वमाशंकमानाः स्वशरीरसंबंधं पूर्वं प्रतिषिद्धैरनार्यैः समं चक्रुर्गत्यन्तराभावादेव. न खलु अनार्येभ्यो यवनान् सभाधिनान् कोऽपि सचेता मनुते. एवं स्पष्टतरे वृत्ते जागरूके सत्यपि ते तदानींतनैर्यतिप्रवरैः पुनरपि संस्कृत्य क्षात्रियतां लंभयित्वा स्वकर्मानुष्ठातुं न प्रोत्साहिता इति महच्छोकास्पदं ? वाचकाः ! शौर्यप्रधाना क्षात्रियजातिर्यस्यामासु नास्तीति कथ्यते तदाऽस्मासु शौर्यमेव नास्तीति कथितं स्यात्. तथासति नपुंसकानां नः को वा जगति मानः ? वीरभोग्या वसुंधरा ! प्रत्युत यदा शिवराजचन्द्रमाः समुल्लास तदा बहवः खलु यवनधर्मानुसारिणस्त्यक्तसनातनधर्माणः स्वस्वजातीयाः पुनरपि संस्कारैः संस्कृत्य स्वधर्मानुसारिणः कृताः. यथा निंबाळकरोपनामा कश्चन क्षात्रियश्रेष्ठो विजापुराधीशस्य कन्यां परिणीय महंमदीयधर्मदीक्षं

जग्राह. शिवराजो यदा स्वराज्यस्थापनाव्यग्र आसीत्तदा तादृशस्य बलिनः प्रधानयवनराजसेवकस्य साहाय्यमपेक्षमाणा शिवराजमाता जिजादेवी शंभुदेवदेवालये यथाशास्त्रं संस्कारैस्तं पावयित्वा तस्य पुत्राय स्वपौत्रमिदात्. सज्जनाः! पश्यत जिजादेव्या दूरदर्शित्वम्? ततएव मध्यसमये बलिष्ठानपि यवनान् निर्जित्य स्वराज्यं स्थापयितुं शिवराजः प्रभवत्. एवं जाग्रति पुरावृत्ते शिवराजः शूर इति निःसंदिग्धं ब्रुवतो जनान् वीक्ष्य वयं परं दुःखाकुला भवामः! अस्तु. किंगतानुशोचन. प्रकृतमनुसरामः. यद्यपि क्षत्रियकुलशाखानां दक्षिणापथमागतानां साङ्गोपाङ्गेतिहासो नोपलभ्यते तथापि ये खलु समुपलब्धा वृत्तान्तास्तेभ्य एव कथंचिदृतं संगृह्य लिखामि. ताश्च शाखाः संक्षेपेण यथा—शिर्के, घाटगे घोरपडे, मोहिते माहाडिक-मोरे, सावंत, निंबाळकर जाधवेभ्युपाख्या यवनराज्ये न्यूनाधिकांश्चाधिकारान् लब्ध्वा तानेवासेवन्त.

१ तत्र शिर्केवंशजाः प्रथमं कोंकणविभागे न्यवसन्. स च विभागः प्रकृत्यैव दुर्गमसह्याचलशिखरव्याप्तो यवनानां दुर्जयोऽभवत्. तत्र च स्थिता यथाशक्ति विजापुराधीशमनमन्तः स्वातंत्र्येणावर्तन्त. अथ यदा विजापुराधीशोऽन्यैरार्यजनैः समं मिलित्वा तानजयत्तदा तेऽस्मिन्नेव कोंकणविभागे विराजन्तं सुवर्णनामानं स्वतंत्रं स्वकीयं भूपालमाश्रयन्त. ततः शिवराजं स्वातंत्र्यार्थं प्रयतमानं निशम्य

प्रमुदितास्ते सर्वेऽपि स्वाभिमानशालिनस्तस्य साहाय्यार्थमागच्छन्. सोऽपि तान् शूरान् संगृह्य तत्रैकस्य कन्यां शिवराजः स्वस्नुषामकरोत्. स्वयमपि तद्वंशसंभूतां कन्यां पर्यणयत्. स्वकन्यामपि तत्कुलोत्पन्नाय गणाजिरावनाम्ने शूराय ददौ. एतेषामीदृशोपनामलाभे तन्निवासग्रामे 'शिरकाई' देव्या अस्तित्वमेव कारणं.

२ घाटगेवंशजा महाराष्ट्रदेशे लब्धप्रतिष्ठा नूतनाभिः स्वप्रतापार्जिताभिः 'प्रतापसिंह'प्रभृतिभिः सन्मानबोधिकाभिः पदवीभिः समलंकृताः जगंचला आसन्.

३ घोरपडेवंशजाः 'सांडनाईक.मुधोळकर. दलवाडकर. गुतीकर.' इत्यादिनामभेदेन सिद्धा लढव एव. तेषां च प्राथमिकं नाम भोंसले इत्येव. परन्तु कश्चन प्रतापी एतद्वंशजः पुरुषो यवनाधीशं सेवमानस्तदर्थं घोरपडीनाम्ना दुर्गारोहणयंत्रेण किमपि दुर्गं समारुह्य जिगाय. तेन च तादृशं तस्य नाम बभूव. इमेऽपि शिवराजस्य सहाया एव.

४ मोहितेकुलसंभूताः पुरुषाः पराक्रमशालिनोऽभवन्. तत्र शिवराजस्य मुख्यः सेनापतिर्हंबीरराव्नामा मोहितेकुलसंभूत एव. तथा शिवराजस्य सापत्नमाताऽपि.

५ महाडिकवंशजाअपि नरवीराः परमशूराः प्रथमतः स्वतंत्रा एव, तथापि मोरेकुलसंभवैः पुरुषैर्जिताः श्रीशिवराजमाश्रित्य देशोद्धारं चक्रुः. एतत्कुलसंभूताय हरजीराजाय श्रीशिवराजः स्वकन्यामदात्.

६ मोरेवंशधराअपि पुरुषा अंशतः स्वतंत्राः सर्वं कोंकण-विभागमपालयन्.

७ सावन्तान्वयसंभूता नरा विजापुराधीशानुग्रहेण परं वैभवं समपादयन्.

८ निंबाळकरकुलजाअपि पराक्रमशालिन आसन्. अद्यापि ते स्वराज्यं भुंजते. एते खलु परमारनामकसुप्रसिद्धक्षत्रियकुलसंभूता इति प्राचीनेतिहासविदो वदन्ति. एतदन्वयसंजातो जगपाळरावनामा क्षत्रियश्रेष्ठः स्वतंत्र एवासीत्. अस्मच्चरित्रनायकस्य पितामही जगपालरावस्य भगिनी. अस्मिन् वंशे संजाता मुधोजीरावस्य कन्या शिवराजस्य ज्येष्ठपत्नी.

९ इदं जाधवकुलं प्रसिद्धाद्यादवकुलात्संभूतं तच्छाखाभूतमेव. अस्मिन्नेव सुप्रसिद्धो देवगिरिनाथो रामदेवरावोऽभूत्- अतएव जाधव-शब्दोऽपि यादवशब्दस्यापभ्रंश एव. यदा च महंमदीयैर्दक्षिणापथो

जितस्तदा निभृतं ते खानदेशनामके दक्षिणापथविभाग एवातिष्ठन्. ततश्च क्रमेणेतरक्षत्रियवदिमेऽपि निजामशाहीराज्ये लब्धप्रतिष्ठा नानापराक्रमाकृत्यान्यकार्षुः. वाचकाः ! संक्षेपतः केवलं स्वरूपप्रदर्शनार्थं मेयमाः शाखा निरूपिताः. अन्याअपि बह्व्यः शाखा देशभेदेन कालभेदेन च विपरीतकुलाभिधाना विपत्त्या स्वीकृतनीचव्यवसायाः सर्वत्रैव महाराष्ट्रदेशे न्यवसन्निति सूक्ष्मदर्शिनामितिहासविदां मतं. ताश्च शिवराजसमये लब्धावसराः शौर्येण यवनांस्तिरश्चक्रुः.

(२)

वाचकाः ? यथा काश्चन क्षत्रियशाखा दाक्षिणापथमागतास्तथैव काश्चन मेवाडनाम्नि भारतस्य मध्यप्रदेशेऽप्यवसन्. सोऽपि प्रदेशो विस्तीर्णपर्वतगणपरिवेष्टित एव. यथैव दाक्षिणापथे सह्याचलमाश्रित्योपरिदर्शिताभिः क्षत्रियशाखाभिः स्वरक्षणं कृतं, तथैव राजस्थानवासिभिः क्षत्रियकुलैररवलीप्रभृतीन् पर्वतान्. दिल्लीश्वरादयो यवनराजाः समप्रदेशे आर्यान् जेतुं शक्ताअपि दुर्गमे दुर्गाकुले पर्वतसंकुलेदेशे न ते आर्यान् जेतुमशकन्. तेन प्रायः सर्वेऽपि क्षत्रियवर्गा यवनत्रासभिया दुर्गमारण्यसंकुल एव स्थाने न्यवसन्. अस्तु. सम्प्रति राजस्थाने दृश्यमानानि सर्वाण्यपि क्षत्रियकुलानि सुप्रसिद्धयो रामायणमहाभारतगीतयोः सूर्यचन्द्रवंशयोरेव शाखाभूतानि. एतदुभयकुलसंभूता बहवो वीराः स्थाने स्थाने नूतनानि राज्यानि स्थापयामासुः. अधुना च प्राधान्येन राजस्थाने चत्वारि

सूर्यवंशसंबद्धानि तथा द्वे चन्द्रवंशसंबद्धे क्षत्रियकुले विराजतः. तत्र राठोडवंशो जोधपुरे, कच्छवाहवंशो जयपुरे, गोहेलवंशो भावनगरे, तथा भाटीवंशो जैसलमीरे, जाडेजावंशो जामनगरे, विराजते. मुख्यो गेहलोटवंशस्तु उदयपुरे सूर्यवत्प्रकाशमानः सम्प्रति भगवतीमनेकसतीवीरजननवित्तां सकलभारतेतिहासप्रसिद्धां राजस्थानभूमिं तिलकः सौभाग्यवतीमिव भूषयति. वाचकाः! नास्ति अत्र सर्वेषामेवापरिदर्शितानां वंशानां वर्णनस्यावश्यकता. ते हि मया विरचिते श्रीमहाराणाप्रतापसिंहचरिते सम्यग्वर्णिताः. अस्य चरित्रनायकस्य गेहलोटवंशजत्वेन तमेव केवलं वर्णयामि.

तत्रभवतो भगवतः कौसल्यानन्दनस्य श्रीरामचन्द्रस्य कुशलवौ नाम द्वौ पुत्रावास्ताम्. तत्र कनिष्ठो लवो लाहोरनगरं वासयामास. अवन्तिनाथे विक्रमादित्ये राजनि सति कनकसेनो नाम राजा सौराष्ट्रदेशमागत्यावास. ततआरभ्यायं वंशः सेननाम्ना व्यपादिश्यत. अयं च कनकसेनो यदा परमारराज्यमाक्रम्य तत्रैव न्यवसत्तदा तद्वंश्यैस्तत्र नाना नगराणि वासितानि. तेषु वलभीपुरं नाम नगरं मुख्यमासीत्. तत्र च कनकसेनवंश्यः शिलादित्यो नाम राजा प्रबलैर्यवनैः समं युध्यमानः सपरिवारं रणे निहतः. तदानीं तस्य भार्याऽबुपर्वते वर्तमानं भगवतीमान्दिरं गता तत्रैव सर्वं कुलक्षय-वृत्तमशृणोत्. दुःखाकुलाऽपि सा कठोरगर्भतया स्वर्गवासिनः पत्यु-

र्मार्गमनुसर्तुमक्षमा तत्रैव निभृतं वसन्ती सुलक्षणं पुत्रं सुषुवे. तं च पुत्रं विप्रसात्कृत्य स्वर्गं जगाम. स च बालको वर्धमानः शैलसंभूततया गुहिति जनैर्व्यपदिश्यमानो लब्धबालश्यो वनचरैः स्वाधिपत्वेन स्वीकृतो नूतनं राज्यं स्थापयामास. तस्य कुले षट् राजानः समभवन्. सप्तमे महाद्रिये राजनि केनापि निमित्तेन संधीभूय समुत्थिता वनेचरास्तं स्वाधिपमनन्. तस्य पत्नी गर्भिणी बाप्पारावळनामानं पुत्रं प्रासूत. बाप्पारावळश्च बाल्ये विप्रेण पालितोऽपि यौवने चितोडाधिपस्य सवर्णो भूत्वा बह्वन्ति पराक्रमकृत्यान्यकरोत्. अन्ते च बाप्पारावळाय स्वकीयं राज्यं समर्प्य चितोडाधिपः स्वदेहसाफल्यं विधातुं वनमगात्. तदिनमारभ्यायं वंशश्चितोडनगरे विराजमानोऽद्यापि वर्तते. एतत्कुलसंभूतः कदचन राजा सेवकदोषेण पीतमद्य आत्मानं पापिनं मन्यमानस्तस्य पापस्य निवृत्तये सीसकरसं निपीय प्राणाञ्जहौ. ततश्चास्य कुलस्य नाम 'शिसोदिया'इति संवृत्तमिति प्राचीनेतिहासविदो वदन्ति. अस्तु. तत्र स्वातंत्र्येण स्वराज्यं पालयतस्तद्वंशजान् समग्रभारतस्वामिनो दिल्लीश्वरा भूयोभूयोऽपीडयन्. तथापि ते दिल्लीश्वरं नानमन्. अथ लक्ष्मणसिंहे चितोडाधिपे सति अयं परदारसंसर्गलोलुपः प्रसिद्धो दिल्लीश्वरोऽल्लाउद्दीनस्तस्य पितृव्यपत्नीं महासाध्वीं लावण्यखनिमाकर्ण्य तां कामयमानः प्रायुध्यत. राज्ञा लक्ष्मणसिंहेन पराजितोऽपि साभिनिवेशं भूयोभूयः प्रावर्तत. लक्ष्मणसिंहश्च तस्याभिनिवेशं तथा

स्वसचारीयाणां विदारणं हानि च श्रुत्वा क्रुद्धोऽस्य युद्धस्यान्तं चिकीर्षुः पर्वतानि भा[illegible] अनिगान्दृश्य कुंकुमस्रग्धारिभिरखिलैः क्षत्रियवीरै. सर्वं स्वानं-सारानकरो. यवनाश्च ते तां न्यूनीकृत्य स्वर्गमारुरोह.

संग्रामशृङ्गिसंज्ञात् पुत्रं सत्यमल्लक्ष्मणाभिधं स्वस्य वंशक्षयो नाभूदिति [illegible] तस्मिन्नेव पुत्रमजयसिंहं निभृतमन्यत्र गन्तुमादिश [illegible] वैरसिंहं सत्यश्रवसोः पुत्रं बालं हम्मीरसिंहं [illegible] चूडाभरणं स्वीयं राज्यं यवनेभ्यो विजित्य तत्र [illegible] परिष्ठा स्वयं मंत्री बभूव. अथ महाभागोऽजयसिंहो [illegible] पुत्र सत्यसिंहः सच्छीलः स्वपितृव्यपुत्रेण सार्धं स्वयं गन्तुकामो राज्यं हम्मीरसिंहं निभृतमस्थापनेच्छया दक्षिणापथमाप्तौ. सत्यसिंहो नाम स्वयं दक्षिणापथविभागं निर्जित्य तत्र स्वसंभोग [illegible] रणमास. अस्य परमपवित्रे वंशे महाराजलक्ष्मीसिंह [illegible], महाराजभीमसिंह, महाराजदेवराज.प्रभृतय. पुत्रपौत्रा [illegible] यन्त. ते सर्वेऽपि क्रमेण यवनैः समं निरं प्रयुध्य स्वराज्यमरक्षन्.

(२)

यदा यदा हम्मीरराजो राज्यमकरोत्तदा सर्वतः प्रबलीभवन्तो यवनास्तं मूलोमूलोऽपीडयन्. प्रबलं मेवाडाधिपतिं विजेतु-

मशक्ता यवनास्तद्वंशजं देवराजमहाराजमेव जित्वा सामन्तं कर्तुं प्रायतन्त. यदा च देवराजमहाराजो यवनेभ्यो राज्यपालनमशक्यममंस्त तदा तदाधिपत्यस्वीकारेण स्ववंशं कलंकयितुमनिच्छन् राज्यं विहाय महाराष्ट्रमागतो भीमाकृष्णानद्योर्मध्ये स्वल्पं देशमाक्रम्य यथाकथंचित्कालं यापयामास. तमिमं देवगाजमहाराजं यवना इत्थमद्विषन् यत् स स्वकीयं नाम परिवर्तयामास. स च महाराज आत्मानं भोंसावन्तनाम्ना संबोधितुमारेभे. अयमेव भोसावंतशब्दोऽग्रेऽपभ्रंशरूपेण भोसलेपदेन जनैरुच्चारितस्तदेव स्वरूपं बभार. एष देवराजमहाराजः प्रकृत्यैव स्वातंत्र्यप्रियः स्वीयं नूतनं राज्यं महाराष्ट्रे स्थापयितु प्रायतत. परन्तु सर्वतो मुहम्मदीयानां त्रासान्न यशो लेभे.

अथ तदीया वंशजाअपि क्रमेण नानाग्रामाणामध्यक्षतां स्वीकृत्य कथमपि अजीवन्. अस्य वंशे 'इन्द्रसेन, शुभकृष्ण, रूपसिंह,-भूमीन्द्र, धापजी, वरवटजी, कर्णसिंह, संभाजि, शिवाजिनामानः पुरुषा अजायन्त. तत्र चरमः शिवाज्यपरपर्यायो बाबाजिः खलु अस्मच्चरित्रनायकस्य प्रपितामहः. अयं चातीव सदाचारी दीनवत्सलो महामना आसीत्. तस्य द्वौ पुत्रौ मालोजिविठोजिनामानौ.

(४)

वाचकाः ? अयं खलु मालोजिराजोऽस्मच्चरित्रनायकस्य पितामह इति यथासंभवं तदीयं चरितं सविस्तरं वर्णयामि. असौ मालो-

जिराजो जीवति पितरि देऊळगांवग्रामस्याध्यक्षतां स्वीकृत्य कथंचि-
दवसत्. परन्तु कृषिकर्मणा जीवनेऽसन्तुष्टः स स्वगृहं विहाय ततो
निर्गतः सबन्धुः सिंधखेडाधिपस्य यादवकुलोत्पन्नस्य लक्ष्मणजाधव-
रावस्य सेनायां सैनिकोऽभवत्. अयं च लक्ष्मणजाधवरावो निजाम-
शाहीराज्ये लब्धप्रतिष्ठो द्वादशसहस्रसादिनामाधिप आसीत्. सोऽपि
सानन्दममुं मालोजिराजं तथा तदीयं बन्धुं विठोजिं स्वसेनायां
सादित्वेनास्थापयत्. अयं मालोजिराजो जगपालरावनिंबाळकरस्य
भगिनीं दीपादेवीं पर्यणयत्. एवं क्रमेण कियति काले गते सा मालोजि-
राजस्य पत्नी दीपादेवी पुत्रमलब्ध्वाऽऽत्मानं वंध्यां मन्यमाना प्रति-
दिनमखिद्यत. अथ कतिपयमासैः सफलीभूतमनोरथा क्रमेण पुत्रद्वयं
लेभे. तत्र च ज्येष्ठस्य नामधेयं शहाजिः, कनिष्ठस्य तु शरीफाजिरिति.
ज्येष्ठः शहाजिराजः सुस्वरूपश्चपलोऽतीव गुणी चतुरः सर्वेषां प्रिय
आसीत्. स च लक्ष्मणजाधवरावस्य कन्यया पंचवर्षया जिजाद्ख्या
समं बद्धसख्योऽक्रीडत्. एवं गच्छति काल एकदा रंगपंचमीमहोत्सवे
क्रीडार्थं सर्वानपि स्वकीयांस्तथा सेनाप्रमुखांश्च जाधवराव आह्वयति
स्म. तत्रेतरवदाहूतो मालोजिराजोऽपि बालेन सुव्यवस्थितनेपथ्य-
शालिना पुत्रेण शहाजिराजेन सममुत्सवस्थानं ययौ. सर्वेषु मुख्येष्व-
धिकारिषु स्वस्वस्थानमलंकुर्वत्सु सत्सु जाधवरावोऽपि समागतः
सर्वैर्जनैः कृतान् प्रणामान् स्वीकुर्वन् मुख्यं स्थानमलंचक्रे. स तु
दूरं स्थितस्याऽपि मालोजिराजस्य पुत्रेण हृतमानसः सस्मितमुखकमलो

महता प्रेम्णा तं स्वसमीपे स्थातुमाव्हयत्. सोऽपि महाभागः शहाजिराजो महता विनयेन तस्य समीपं गत्वोपविवेश. तं च स्वपितुःसमीपे स्थितं स्वबालमित्रमवलोक्य जिजादेवी सत्वरमागत्य पितुरंकमारुरोह. तौ च समानवयस्कौ सुस्वरूपौ बालौ वीक्ष्य जाधवरावः सहासं लीलया जिजादेवीमपृच्छत्–वत्से ? वांच्छसि त्वमिमं पतिमिति. अनन्तरमेव तौ बालकौ भाविना शुभेन चोदितौ महाराष्ट्रस्य पुण्यसंचयेन प्रेरितौ वा परस्परगात्रयोः सुगंधि द्रव्यमक्षिपताम्. मीलिताः सदस्याअपि तयोरिमामनुरूपां क्रीडामवलोक्य विस्मिताः 'सर्वथा योग्याविमौ दम्पतीत्वे' इत्यवोचन्. तदानीमेव मालोजिराजः समुत्थाय जगाद–सभ्याः ! जाधवरावाः खलु अद्यप्रभृति नः संबंधिनः संवृत्ताः. तेषां वाक्यं भवद्भिः श्रुतमेव. महान्तः सकृदुच्चरितं शब्दमन्यथा न परिवर्तयन्ति इति. सकलाः सभ्याअपि सत्यमेवेदमिति बभाषिरे. ततश्च द्वितीये दिने भोजनार्थमाहूतोऽपि मालोजिराजः विवाहसमय एव युष्माभिः सह भोजनं भविष्यतीति दूतद्वारा निवेद्य भोजनार्थं नाजगाम.

तदिदं वृत्तं जाधवरावस्य पत्नी म्हाळसादेवी श्रुत्वा नितान्तमकुप्यत्. सा तथा स्वपतिमस्मिन्विषयेऽदूषयद्येन जाधवरावः 'केवलं सभायामहं तथा विनोदेनावदम्. न तथाऽस्ति ममाशयः' इत्युक्त्वा तां सान्त्वयामास. न्यवेदयच्च तथैव मालोजिराजाय. तथापि मालो-

जिराजं बद्धाग्रहं वीक्ष्य क्रुद्धः स जाधवरावस्तं सबन्धुं स्वसेवातो निरवासयत्.

अनया रीत्या मालोजिराजः सर्वां प्रतिष्ठां गमयित्वा पुनरपि-कृतीवलः संवृत्तः. वाचकाः ? पश्यत धनस्य माहात्म्यं. मानिन उच्चकुलोत्पन्नस्यापि शूरस्य मालोजिराजस्य धनाभावेनेयानपमानः ? एतेनात्र संसारे हि धनमेव सकलप्रतिष्ठाकारणमिति निर्णीतमेव. यद्यपि केचन विद्यया लब्धसन्माना दृश्यन्ते तथापि अपवादा एव ते. अतो येन केनाऽपि विद्याभिलाषिणा धनमूलका मानो हयेव. यो हि धनमूलकं मानमभ्यर्थयेत तेन सर्वथा धनसंपादन एव प्रयत्नः करणीय इति तत्त्वम. अस्तु. एवं मानधनः स मालोजिराजो जाधवरावादपमानं लब्ध्वा दुःखाकुलो धनाभावमूलकोऽयमपमान इति दृढं निश्चित्य धनसंपादनार्थं प्रायतत.

एकदा पूर्णचन्द्रचन्द्रिकाधवलितसकलमहीमण्डले पूर्णमादिने मालोजिराजः समं स्वबन्धुना क्षेत्रं पालयन्नवस्थितो मध्यरात्रे पुर-स्ताद्वर्तमानाद्वल्मीकान्निर्गतं सुवर्णरत्नकंकणमण्डितं करमवलोक्य विस्मितस्तद्वृत्तं स्वबन्धवे न्यवेदयत्. स तु तं सर्वं केवलं भासं बद्धंस्तूष्णीमातिष्ठत्. ततश्च सुप्ते मालोजिराजे स्वप्ने साक्षाज्जगदंबा शुभ्रवस्त्रपरिधाना स्मेरमुखी तं स्पष्टमवदत्—वत्स ? चिन्तां

मा कुरु. अहं हि प्रसन्नाऽस्मि. अस्मिन् वल्मीके सर्पो विद्यते तं नमस्कृत्य वल्मीकं खन. स तु भुजंगोऽन्यत्र गमिष्यति. तस्मिन् वल्मीके त्वं प्रभूतं धनं लप्स्यसे. त्वदीया वंशजाः सप्तविंशतिसंख्याकाः स्वतंत्रा राजानो भविष्यन्ति इति. तामिमं स्वप्नं वीक्ष्य जाग्रत् मालोजिराजः स्वबन्धवे सर्वं कथयित्वा तद्वल्मीकमखनत्. खाते च तस्मिन् भगवत्याज्ञानुरूपं बहु धनं लेभे. अथ जगदंबावरप्रसादलब्धं धनं प्राप्यात्यन्तमुत्साहितो मालोजिराजः स्वधनव्ययेन सहस्रमब्राह्मणानामस्थापयत्. तथा स्थाने स्थाने देवालयान् सरांसि च निर्माय ब्राह्मणान् भोजयन् स्वकुले शकस्य कर्ता भविष्यतीति विख्यापयामास.

एवमुत्कर्षं लब्ध्वा पुनर्विज्ञापितोऽपि जाधवरावो यदा स्वकन्यां दातुं नैच्छत्तदा क्रुद्धो मालोजिराजः समं स्वसैन्येन स्वश्यालस्य च सैन्यमादाय सर्वं जाधवरावस्य भूविभागमपीडयत्. परन्तु जाधवरावो न स्वाग्रहं मुमोच. ततश्च मालोजिराजो जाधवरावस्य शासनार्थमन्यांस्च युक्तिमुपायुंक्त. स च महता वेगेन निजामशाहीराज्यं प्रविश्य दूरागोलिनगरे स्वयंहृतान् सूकरान् कण्ठनिबद्धसंदेशपत्रान् महंमदीयानामुपासनामंदिरेषु न्यक्षिपत्. अलिखच्च तेषु पत्रेषु 'अयं जाधवरावः प्रथमतः सभायां स्वकन्यां मदीयस्नुषां विधातुं दत्तवचनोऽपि स्त्रीप्रतिरोधात्तथाऽधुना नानुतिष्ठति. तदयमन्यायो

दूरीकर्तव्य इति. तां च वार्तामुपासनामंदिराध्यक्षाः स्वाधिपाय न्यवेदयन्. तां निशम्य निजामशाहीश्वरो यवनोऽत्यन्तं चुकोप. स सत्वरमेव तं जाधवरावं समाहूय परं निरभर्त्सयत्. अवदच्च—यूयं सभायां तथोक्त्वा पुनरपि स्त्रीबुद्धिमाश्रित्य निवर्तध्वे ? एतदर्थमेव मालोजिराजेनास्माकमुपासनामंदिराणि दूषितानि. तदिमं वृथाकलहं विहाय तस्य पुत्राय कन्यां दत्तेति. जाधवरावस्तु स्वस्वामिन इदं वचनं निशम्य मूढमतिरपि धैर्यमवलंब्य 'अयं मालोजिः केवलं मानादिनाऽस्माकं सदृशो नेति तथाकर्तुं विचारयाम' इति जगाद. यवनाधिपोऽपि तदानीमेव मालोजिराजमाहूय द्वादशसहस्रसादिनामाधिपत्यं, तथा चाकणशिवनेरीदुर्गे, पुणेसुपेप्रान्तविभागौ तस्मै वित्तीर्य राजेपदव्या तमभूषयत्.

वस्तुतस्तु यवनोपासनामंदिरदूषणं नाम मालोजिराजस्यैवापराधः. तेन स एव दण्डार्हस्तथापि तस्मिन् समये दिल्लीश्वरो दक्षिणापथस्थानि यवनराज्यानि नाशयितुमुद्यतः, तत्प्रतीकारार्थं च दक्षिणापथस्था यवनाधिपा महाराष्ट्रस्थान् क्षत्रियान् स्वानुकूलान्विधातुं प्रायतन्त. एतस्मादेव कारणात् मालोजिराजस्तेन यवनाधिपेन न दण्डितः. ततश्च मालोजिराजं सर्वथा स्वानुरूपमवलोक्य जाधवरावोऽगत्या स्वकन्यां मालोजिराजस्य पुत्राय शहाजिराजाय वितातार. वाचकाः.

विवाहोत्सवस्तु स्वयं यवनाधिपेनाधिष्ठित इति लोकोत्तर एव बभूव. मालोजिराजोऽपि स्वयोग्यतानुरूपं धनव्ययं विधाय सर्वानतोषयत्.

एवं स्वपराक्रमैरुत्कर्षं लब्ध्वा राज्यकर्मणि परां योग्यतां दर्शयन्तो भूयोभूयोऽधिकमेव सन्मानं प्राप्य मालोजिराजा स्वार्जितस्य भूविभागस्योपभोगं पंचदशवर्षपर्यन्तं गृहीत्वा दिवं जग्मुः. शहाजिराजश्च तत्स्थानं लेभे.



३ –पितृचरितम्.

१. शहाजिराजस्य निजामशाहीराज्यसेवा.

२. विजापुरेश्वरसेवा.

३. जिजादेव्याः स्वभावः

(१)

शहाजिराजश्च स्वपितृस्थानं लब्ध्वा यदा राज्यकार्याणि कर्तुं प्रारभत तदा तस्य यवनराज्यस्य प्रधानमंत्री मलिकंबरनामा यवन एवासीत्. स च परमचतुरः स्वराजधानीं देवगिरिसमीपे नूतनं खडकीनामकं नगरं निर्मायाकरोत्.

अथाजिगदेव मोंगलकुलसंभूतो जहांगीरनामा दिल्लीश्वरः स्वपुत्रं महता बलाढ्येन सैन्येन सह महाराष्ट्रदेशवर्तीनि यवन-

राज्यानि आक्रमितुं प्रेषयामास. स तु प्रथमं निजामशाहीराज्यमेवाचक्राम. मंत्री मलिकंबरः प्रथमतो महता धैर्येण तत्प्रतीकारमारभत, परन्तु शीघ्रमेव पराजितः पलायनेनात्मानं ररक्ष. प्रधानमंत्रिणं मलिकंबरं पराजितमवलोक्याऽपि अत्यक्तधैर्यः श्रीशहाजिराजो महता साहसेन भूयोभूयो निभृताक्रमणैर्मोंगलसैन्यं जर्जरमकरोत्. तदानीं मोंगलसेनापतिः शहाजहानो मनस्यचिन्तयत्. यावदिमे क्षत्रिया इदं निजामशाहीराज्यं रक्षन्ति तावदिदमजय्यमेव. तदिमे कयाऽपि युक्त्या भेदनीया इति. विचिन्त्य चैवं निजामशाहीराज्यस्याधारभूतान् सहायकान् क्रमेण धनादिना वा मानादिनाऽभेदयत्. तेषु च शहाजिराज एव स्वामिद्रोहमकृत्वा सर्वं धनमानादिकं निराकृत्य स्वामिपक्ष एवातिष्ठत्. तदीयः श्वशुरो जाधवरावस्तथाऽन्ये प्रमुखाः सामन्ता लोभाकुलाः स्वामिद्रोहं विधाय शत्रुपक्षमवालम्बन्त. अन्येऽपि साधारणा दिल्लीश्वरस्य सामर्थ्यमवेक्ष्य भीतास्तदनुकूला अभवन्. प्रधानमंत्री मलिकंबर एवं स्वकीयानां द्रोहमालोच्य दुःखाकुलः कथमपि दिल्लीश्वरेण संधिं विधायात्मानममोचयत्. जगाम च स्वर्गं लोकं.

दिवंगते मलिकंबरे पुनरपि संधिं विहाय दिल्लीपतिर्जाधवरावस्य साहाय्येन युद्धं प्रावर्तयत्. अस्मिन् समये बालं निजामशाहीश्वरं रक्षितुं शहाजिराजादन्यः कोऽपि नासीत्. वाचकाः ? पश्यत दुर्दैवस्य प्रभावं. यो हि निजामशाहीराज्येश्वरः प्रभूतसामन्तमण्डलवन्दित आत्मानं शक्रादपि श्रेष्ठममन्यत, तद्वंशजमेव बालं प्राणरक्षार्थं

निभृतमरण्यादरण्यान्तरे पर्यटन्तमालोक्य कस्य मनो न दुःखायेत. केवलं शहाजिराज एवैकाकी तं बालं तथा तदीयां मातरं रक्षन् कथमपि अवर्तत. अत्रान्तरेऽकस्माद्दिल्लीश्वरो जहांगीरः परलोकमगात्. तेन तदीयः पुत्रः शहाजहानः सिंहासनाधिरोहणाय दिल्लीनगरमगच्छत्. गमनसमये च स जाधवरावं महता सैन्येन समन्वितं विधाय निजामशाहीराज्याक्रमणार्थमयोजयत्. प्रकृतिचतुरः शहाजिराज एनं स्वल्पमवसरं लब्ध्वा तं स्वस्वामिनं मात्रा समं माहुलीदुर्गेऽस्थापयत्. जाधवरावश्च निजामशाहीश्वरं तस्मिन् दुर्गे निवसन्तमाकर्ण्य तद्दुर्गं प्रतिरुरोध. प्रतिदिनं क्रमेण तं दुर्गरोधं दृढं चक्रे. श्रीशहाजिराजस्तु क्रमेण वर्धमानं शत्रोर्बलमवेक्ष्याऽपि अनिराशो धैर्यमवलंब्य शत्रोरागक्रमणानि विफलीकर्तुं प्रायतत. परन्तु यदाप्रभृति राजमातरं कपटमतिना राजद्रोहिणा जाधवरावेण बद्धस्नेहामपश्यत्तदारभ्य खिन्नः कथमपि आत्मानं ततो मोचयितुं मनश्चक्रे. शीघ्रमेव घनान्धकारप्रावृतसकलदिग्भागे मध्यरात्रे तं बालं पुरतो गृहीत्वा तस्माद्दुर्गाद्बहिर्यो शत्रुसैन्यसमूहं विवाय निंबाळकस्य स्वमातुलस्य प्रदेशमालक्ष्य जवेनाययौ. तदानीं माता जिजादेवी गर्भवत्यपि स्वपतिना समुत्साहेन दधाव. अचिरादेव लब्धवृत्तः स जाधवराव आश्विकदलेन समं तमनुससार, परन्तु भाग्यशाली शहाजिराजः शीघ्रमेव स्वामिना समं स्वमातुलस्य प्रदेशमाययौ. तं च मातुलस्य

प्रदेशमागतमालोक्य स्वनाशभीत्या जाधवरावस्तदनुरोधं त्यक्त्वा पुनरपि माहुलीदुर्गस्य समीपे स्थितं स्वस्कंधावारमाजगाम.

इतश्च निजामशाहीराज्येऽधिकारपरिवृत्तिरभूत्. अन्य एव कश्चन निजामशाहीराज्येश्वरो नाम भूत्वा दिल्लीश्वरं पराजयत. तेन लोभाकुलो जाधवरावः पुनरपि दिल्लीश्वरपक्षं त्यक्त्वा निजामशाहीराज्यं सेवितुमायथौ. स तु कपटमतिर्जाधवरावं सपुत्रमनुग्रहीतुमिच्छन्निव सभामानीय शाखिकैः पूर्वं संकेतितैरघातयत्. शहाजिराजस्तु स्वश्वशुरस्य तथा स्वश्यालस्य च राजसभायां वधमाकर्ण्य दुःखाकुलो मनस्यकरोत्—इमे यवना महापापाः कृतघ्नाः सर्पा इव कदा केन विधिनाऽश्रितानां प्राणानपहरिष्यन्तीति अस्माऽपि न जानाति. वयं च शूराअपि पक्षयहीना उदरभरणार्थमिमानाश्रित्यैवमकाले बलीभूत्वा परलोकं व्रजामः. तस्मात् स्वतंत्रमेव राज्यमधुना स्थापनीयमिति. मत्वा चैवं प्रयतमानः अगाध प्रज्ञाशक्तिं दिल्लीश्वरं विलोक्य स्वतंत्रराज्यस्थापनायोगादुपरतः पुनरपि निजामशाहीराज्यरक्षणार्थं कृतनिश्चयः सत्वरं विजापुराधीशमास्थिन् कर्मणि साहाय्यविधानाय विज्ञापयामास. स च प्रबलाद्दिल्लीश्वराद्भिभ्यन्निजामशाहीराज्यरक्षणे साहाय्ययितुं प्रतिज्ञो. शहाजिराजश्च तस्मिन्नेव क्षणे तदीयसेनां तथा स्वकीयमशेषं सैन्यं गृहीत्वा तं कृत्रिमं निजामशाहीराज्याधीश्वरं पराजित्य स्वरक्षितं बालमष्टवर्षं निजामशाहीराज्यसिंहासनेऽस्थापयत्.

पराजयत च दिल्लीश्वरसेनापतिं. एवं सर्वत उत्कर्षशालिनं तं शहाजिराजमवलोक्य निजामशाहीराज्यस्य मौल्याः प्रधानपुरुषाः शूराः सेनानायका इतस्ततो भ्रमन्तः शूराः सत्यकाम्तस्य स्वामिराज्यरक्षणदक्षस्य शहाजिराजस्य साहाय्यार्थमागच्छन्. शहाजिराजोऽपि तान् सत्कृत्य तेषां साहाय्येन प्रबलानपि दिल्लीश्वरसेनानायकान्निर्जित्य सर्वं तदाक्रान्तं स्वस्वामिराज्यविभागं स्वायत्तीचकार.

(२)

स्वाधिकारिणो निजाम्स्य मेनां च लिखित्य भुजगीं शहाजिराजेन निजामशाहीराज्यस्य स्थापना कृतेति निजाम्स्य विलासमग्नोऽपि दिल्लीश्वरः शहाजहान्: परं मंत्रिभिः स्वसैन्यिकाम्स्य संग्रहं तांस्त्रीन् तुर्या विभज्य मुख्यांस्त्रीन्सेनापतीम्स्त्रिभ्यस्त्रिभ्यः स्वयं दक्षिणापथमाजगाम . सर्वस्याम्य निजामशाहीराज्यस्य मूलभूतं शहाजिराजमेव पराजेतुं स प्रथमतः प्रायतत परन्तु यशो न लेभे. रणधीरेण शहाजिराजेन वंचिता दिल्लीश्वरस्य सेनापतयः स्वामिनः कोपं परिहर्तुं 'शहाजिस्तावत्क्षुद्रः. क्षुद्रस्य सहाये नाशिते सोऽनायासेन विपद्यते. तस्मादस्य सहायं विजापुराधीशं प्रथमतः पराजेष्यामहे. ततः शहाजिमपि द्रक्ष्याम' इति स्वामिनं जगदुः. सोऽपि तदेव न्याय्यं मन्यमानः सहसा विजापुरराज्यं प्रविश्य सर्वं भस्मसात्कुर्वन् शीघ्रमेव विजापुरनगरं रुरोध. विजापुराधिपस्तु तदानीं परं भीतो महता विनयेन

दिल्लीश्वरं शरणं गत्वा कृपामयाचत. दिल्लीश्वरोऽपि क्षमां विधाय कृतसंधिमस्तं शहाजिराजस्य नाशार्थमाज्ञापयत्. यदि च शहाजिराजः संतोषेण सर्वाणि दुर्गाणि तथा भूविभागान् मोक्ष्यति तदा न दण्डनीय इत्यपि विख्यापयामास. ततश्च दिल्लीश्वरः सर्वेण सैन्येन समं शहाजिराजं विजेतुमन्वधावत्. शहाजिराजोऽपि धैर्यमवलंब्य यथाशक्ति दुर्गानुरोधेनायुध्यत, परन्तु मोंगलसेनासागरस्य पुरस्ताच्छीघ्रमेव निरुद्धवीर्यो बभूव. ततो महता दुःखेन स्वकीयानि सर्वाणि दुर्गाणि तथा भूविभागान्दिल्लीश्वराय समर्प्य स्वयं विजापुराधीशं सेवितुं विजापुरनगरमगात्. विजापुराधीशस्तु तं गुणिनं स्वामिभक्तं शहाजिराजं सत्कृत्य पुनरपि तस्मै महादुर्गमण्डितान् भूविभागान् ददौ. शहाजिराजोऽपि लब्धसत्कारो विजापुराधीशं सपरिश्रमं सिषेवे. प्रबलजननिवासे कर्णाटकप्रदेशे तस्य विजापुराधीशस्य स्वामित्वं स्थापयितुं चिरमयुध्यत. महता चातुर्येण सर्वमपि कर्णाटकविभागं स्वायत्तीकृत्य विजापुरराज्यमर्यादामवर्धयत्. महता प्रदेशेन प्रवृद्धं स्वीयं राज्यं विलोक्य सन्तुष्टो विजापुराधीशस्तं सर्वं प्रदेशं तस्मै एव ददौ. शहाजिराजोऽपि तस्मिन्नव प्रदेशे तिष्ठन् पुणेसुपेनामके विभागे कदापि पुनर्नागच्छत्. तत्र च दादोजिकोंडदेवनामकं स्वामिभक्तं विप्रं नियोजयित्वा तद्द्वारा सर्वं कार्यमकरोत्.

वाचकाः! एतावत्पर्यन्तं यन्मया श्रीशहाजिराजस्य चरितं वर्णितं तत्र तदीयमलौकिकं बुद्धिचातुर्यं परिदृश्यत एव. नैतावदेव

किंतु तस्य मनसि स्वतंत्रराज्यस्थापना कर्तव्येति विचारः कथं सूक्ष्मरूपेणासीदिति स्पष्टमालक्ष्यते. परिस्थितेर्विपमतया स विचारः सफलो नाभूदित्यन्यदेतत्. इम एव संस्कारः शिवराजं प्रविष्टा बद्धफला अभवन्.

(३)

सज्जनाः ! इदमपि भूयोभूयो दृश्यते यद्बाला मातृशीलमनुसरन्ति. अत्र च कारणं तासामतिसांनिध्यमेव. यथा हि द्रुतं सुवर्णं निराकारं यां कामपि आकृतिं धत्ते, यथा निर्मलं प्रकाशान्वितं दर्पणं समीपस्थस्य वस्तुनः प्रतिबिंबं, तथा जातमात्रस्य बालस्य निराकारा बुद्धिरतिसंनिहितस्य गुणाननुकुरुते. अतिसंनिहिता च बालस्य माता नान्य इति निर्विवादं. तस्माद्यो यवनानां जेता गोब्राम्हणानां रक्षकः शिवराजो लोकोत्तरो बभूव तत्र कारणं तदीयाया मातुरसाधारणा गुणाएव. तज्जिजादेव्याः संक्षेपतश्चरित्रं वर्णयामि.

माता जिजादेवी जाधवरावस्य कन्या. तस्या विवाहः श्रीशहाजिराजेन समं कथमभूदिति पूर्वं वर्णितमेव. तस्मादेव कारणात् जाधवरावस्य तस्यां तादृशं प्रेम नासीदिति तर्क्यते. अतएव यदा जाधवरावो दिल्लीश्वरसेवको भूत्वा निजामशाहीराज्यनाशार्थमयुध्यत तदानीं शहाजीराजो जाधवरावस्य सेनाया व्यूहं भित्त्वाऽपलायत,

तदा तेन समं गर्भवत्यपि जिजादेवी अश्वमारुह्याधावत. मध्ये च गर्भस्य कठोरतयाऽश्वेन धावितुमशक्नुवानां जाधवरावोऽगृह्णात् पप्रच्छ स्वगृहागमनाय परन्तु मानिनी सा तमन्यन्तं स्वपातिद्वेषमनुमृत्य निरभर्त्सयत्. तथापि स स्नेहवात्सल्यात् सैनिकैरापितां तां कृत्वा जामातृमित्रगक्षिते शिवनेरिदुर्गे निवासार्थं प्रेषयामास.

वाचका: ! अस्मिन् लोके जना उन्नतिं गतास्ते सर्वे मानधना एव. यदि च मानवो मानं जलात्तृणमिवमन्य तस्य नाम्त्युन्नतेराशाऽपि. श्वाऽपि धूत्कृतो न पुनस्तस्य समीपमायाति. सोऽयमलौकिको मानो यावदिवृतं तावत्सु प्रसंगेषु शिवराजे पर्यदृश्यत मातृतएव स समाजगामेति ज्ञायते. अनेनैव स पितृवचनसेवामकृत्वा स्वतंत्रं राज्यमस्थापयत्.

अपरं च तस्यां सकलसंकटानुभवेन प्राप्तं विपत्परिहारचातुर्यं परमासीत्. शहाजिराजः प्रतिदिनं नानाविधा विपदोऽनुभूय स्वराज्यं स्थापयितुं यदा प्रायतत, तदा माता जिजादेव्यपि तत्संनिहिता सर्वं वृत्तमवलोकयामास. तेन कीदृश्यां विपदि धैर्यमवलंब्य तस्या निवारणार्थं कथमुपाया योजनीया इति सा सम्यगजानात्. अयमपि गुणः शिवराजे प्राधान्येन प्रकटीबभूव.

तृतीयश्च गुणो जिजादेव्यासुत्माहातिशयः प्रारब्धकर्मणोऽपरित्यागश्च . इमावेव द्वौ गुणौ श्रीशिवराजं परमुत्कर्षं प्रापयताम्. वाचकाः ! यया खलु लोकोत्तरं पुण्यश्लोकं श्रीच्छत्रपतिशिवाजिमहाराजं जनित्वा सकललोकमातृता संपादिता तां जिजादेवीं वर्णयितुं कः शक्नुयात् ! अस्तु.

४–शिवराजजन्म, बाल्यंच.

१ शिवराजजन्म.

२ बाल्य एव धर्मप्रीतिभूतदयबीजांकुराः

६ निरतिशया स्वातंत्र्यप्रीतिः

४ पुण्यपत्तनवासः.

(१)

अस्ति सुप्रसिद्धात् पुण्यपत्तनात् पंचाशत्क्रोशैः परं, सह्याद्रि-तुंगशिखरपरिवेष्टितं, शिवराजस्वेन भारतमवतरतः शिवस्य क्लेश-परिहारार्थं भगवता विधिना विरचितं गगनांगणसोपानपथमिव, सर्वतः क्रूरवन्यपशुगणनिवासीभूतैर्बहुव्यालैरपि ग्रीष्मेऽपि रविकिरणा-प्रकाशितदरीसहस्रसमंलकृतैर्विस्तृतैररण्यैर्व्याप्तं, स्थाने स्थानेऽमृतम-धुरजलपरिपूर्णाभिर्वापीभिस्तथा सन्मिजानामाकरैस्तडागैर्भूषितं, महा-राष्ट्रजनहृदयपटलेनेवाभेद्येन यवनानां भयंकरैः शतघ्नीनिक्षिप्तैरयो-गोलकैरपि अच्छेद्येन प्राकारवलयेन परिरक्षितं, शिवनेरिनामकं महादुर्गम्.

यच्च सम्प्रति रिक्तमपि, स्थाने स्थाने विदीर्णप्राकारवलयमपि, सर्वतः प्रवृद्धेन घाससंचयेन समाच्छादितमपि, अद्यवन्ध्यतपुण्यश्लोकशिवराजजन्मस्थानमपि, वन्यपशुनिवासीभूतमपि, दृष्ट्वं. दुर्दैवपीडितं महाकुलीनमिव पश्यतां गच्छसि कौतुकं समुत्पादयति. निबोधयति च सर्वस्याश्चैश्वर्यस्यानित्यत्वं. समुत्पिशति चैश्वर्यगर्वभारमुत्सृजन् सर्वथा तं गर्वभारं हातुं. अन्.

अस्मिन्नेव दुर्गे दिल्लीश्वरपक्षपातिना जाधवराजेन सह युध्यमानः श्रीशहाजिराजः स्वमातुलस्य लखुजीराजस्य [illegible] सिंगमिपुर्माहुलीदुर्गान्निर्गतः कतिपयैर्मा भवितुमक्षमा स्वमातरं जिजाईवीं सेवकजनैः सममं स्थापयन्नासीत्. माता जिजाईवी पतिसेवार्थिनं पतिदेवं यापयितुमनिच्छन्ती स्वयं डेरुं पुत्रं शंभाजिराजमपि तेन समं प्रैषयत्. तत्र च गच्छन्तीं मां जिजाईवीं प्रतिदिनं मनोहरेण वातेन तथा सर्वेषां प्रवृत्तानामवरणानां श्रिया मेदिताऽपि प्रत्यहं भर्तृचिन्तयाऽन्तःपरमपीड्यत. सर्वं जनास्तां परं सान्त्वयामासुः परन्तु पतिव्रता सा तां चिन्तां सर्वथा न मुमोच. सा च प्रवृत्तेन अशुभशालिनी तद्दुर्वाचमिनी शिवाजिनामनी दुर्गी प्राप्तवती. सा समुपनिर्ज्येष्ठेन पुत्रेण समं सुखी स्यादथ च निर्गते तस्मिन् सप्तमगर्भवासिनमिमं बालकं त्यक्तवाऽन्यत्र गच्छति. यद्यपि माता जिजाईवी पतिपुत्रचिन्ताव्यग्रमानसाऽऽसीत्यापि स्वपुत्रस्य गर्भवासिनो भाग्योदयसूचकान् दोहदाननुभूय सा परं सुखायतस्म. सा च भिन्नान्

भिन्नान् दोहदानन्वभवत्तथा स्वप्नांश्च ददर्श तथापि बाहुल्येनेममेव स्वप्नं साऽनुभवतिस्म. भगवती भारतभूमिर्गैरूपधरा केनचि-द्विकरालदन्तपंक्तिनाऽऽरक्तनयनेन खड्गहस्तेन राक्षसेन समा-क्रान्ता भीतिविव्हला स्वप्राणरक्षार्थं कैलासवासिनं परमेश्वरं प्रार्थयत. स शीघ्रमेव जिजादेव्या गर्भं प्राप्य निर्गतः खड्गाघातेन तं राक्षसं जघानेति. इमं च स्वप्नं तथा यवनानां नाशार्थं जायमानां तीव्रेच्छां मनसिकृत्वा सा स्वगर्भवासिनं पुण्यश्लोकं गोब्राह्मणप्रतिपालकं भविष्यन्तं मेने. वाचकाः ? ईदृशं शुभसूचकं स्वप्नं तथा दोहदं च समनुभूय कस्याऽचित्तं संतोषं न भजेत! सा च तं स्वप्नं तथा दोहदं च स्वाश्रितेभ्यो ज्योतिर्विद्भ्यः कथयन्ती तानपि प्रमोदमभान-करोत्.

एवं महता सन्तोषेण परिपूर्णेषु नवसु मासेषु सा त्रैलोक्य-माननीया जिजादेवी सकलगोब्राम्हणप्रतिपालकं सनातनधर्मरक्षकं शकस्य प्रवर्तयितारं श्रीच्छत्रपतिशिवाजिमहाराजं प्राची सूर्यमिव प्रासूत. वाचकाः? सर्वतः क्रूरयवनैराक्रान्तेषु भारतवासिषु, बलादेव निहन्यमानेषु ब्राम्हणेषु धेनुकेषु च, कोपार्तैरेव नाशितेषु देवाल्ये-षु देवताप्रतिमासमूहेषु च, दासीक्रियमाणासु आर्यमहिलासु सतीषु साक्षाच्छंकरः सत्या जिजादेव्यास्तनयो भूत्वाऽवततारेति मन्यमाना जनाः परं ननन्दुः. तस्मिन्दिने निर्मलं रविप्रकाशं, मन्दमन्दवाहिनं परिमलसुगन्धिनं वातं, तथा होमाग्नींश्च निर्धूमानवलोक्य साश्चर्या

विद्वांसः स्वंभाग्योदयमदुरवार्तेनमसन्यन्त. सर्वेऽपि शहाजिराजानामाश्रिता जनास्तत्तनयजननं श्रुत्वा प्रहृष्टा उत्सवं कुर्वन्तस्तद्वृत्तं शहाजिराजेभ्यो निवेदयितुं दूतान् प्रैषयन्. ब्राम्हणाश्च स्वयं स्वस्तिवाचनार्थमागताः संप्रमोदेन दिव्या आशिषोऽदुः. सुवासिन्योऽपि पूर्णघटसालंकृतमस्तका मानवरूपधारिण्यो गाव इव तद्भवनद्वारमागत्य जलाभिषेकं चक्रुः ततश्च जातकर्मविधानमाहृता विद्वांसो विप्रवरास्तत्र आगत्य सर्वानपि तान् यथालब्धकान् शिशुला भाविनं सार्वभौमं समशंसन्.

अथ परिपूर्णेषु दशादिवसेषु पुत्रस्य नामकरणमहोत्सवः समजायत. सर्वानपि निमन्त्रितान् समागतान् विलोक्यामिं प्रष्टुमागतान् स्वाभिभक्तान् मंत्रिणस्तथा विदुषः सा माता जिजादेवी जगाद–अहमेकदा सुखेन सुप्ता स्वप्ने कैलासलोकमपश्यम्. तत्र च मिलिताः सर्वे देवगणाः सर्वं पृथ्वीवृत्तमुक्त्वातंनिवेद्य स्वधर्मं रक्षितुं तथा गोब्राह्मणान् पालयितुं तं प्रार्थयन्त. सोऽपि सर्वेभ्यस्तान् मधुरैर्वचनैराश्वास्य जगाद–देवाः! अहमचिरादेव शिवनाम्ना परमपवित्रे भोसलेकुले क्षत्रियवरात् शहाजीराजाज्जिजादेव्यां प्रकटीभविष्यामि! इति. तदानीमेव बालरूपधरः शंकरो मदीयमुदरं प्राविशेत्. तेन कारणेनाऽपि अस्य पुत्रस्य नाम 'शिव' इत्येव स्थापनीयमिति. एवमाज्ञताः श्रुते वृत्तान्ते परं विश्वसन्तस्ते सर्वेऽपि आश्रितास्तथैव नाम विधाय तां वार्तां सर्वत्र प्रसारयामासुः

(२)

वाचकाः ! एवंक्रमेण मृत्युलोकमागतः शंकरः शिवराजनाम धृत्वा प्रतिपच्चन्द्र इवावर्धत. यदा च स दशवर्षोऽभूत्तदा तं पिता शहाजिराजो यवनराजधानीं विजापुरनगरमानयत्. शिवराजस्तत्र-त्रीणि वर्षाण्युवासेति प्राचीनलिखामविदां मतं. विजापुरमधिवसतः श्रीशिवराजस्य बाल्येऽपि सद्गुणानवलोक्य शहाजिराजस्य मित्राणि परं समतुष्यन्. तु च मुसलमानानां यवनाधिपस्य प्रधानमंत्री-शिवराजस्य गुणैः लोकोत्तरैः स्वकीयैः जनैश्च प्रशंसां चक्रे. तेन च विस्मितः स यवनाधिपः सभायां स्थितान् शहाजिराजानवदत् 'श्वः स्वपुत्रं राजसभामानयत' इति. शहाजिराजाऽपि एनां स्वस्वामिन आज्ञामंगीकृत्य गृहमागतः शिवराजाय स्वामिनियोगं तदनुकूलं स्वाभिप्रायं च निवेदयामासुः

शिवराजस्तु तं पितुर्नियोगं श्रुत्वा खिन्नोऽपि धैर्यमवलंब्य जगाद 'तातचरणाः ! पुत्रस्यैव धर्मो यत्पित्राज्ञापरिपालनं. जानाम्य-हमिमं धर्मं. यावच्छक्ति अनुष्ठातुमुत्सहे च. परन्तु यवनाधिपस्य सभां गत्वा पापी स वन्दनीय इति न मे रोचते. यैश्चास्माकं स्वातं-त्र्यमपहृतं, दीनासु अबलासु गोषु तथा भारतमहिलासु पशुवदाचरितं, सनातनधर्मश्च बलादेव नाशितस्तएवार्यकुलसंभूतेन मया वन्दनीया इति महच्छोकास्पदं. मदीयो मातामहस्तथा मातुलश्चैभिर्निष्कारणं हतौ. सर्वथा प्रतीपाचरणेनास्मान् पीडयन्त इमेऽस्माभिः कथं वन्दनीया

इति तातपादा एव विचारयन्तु. मम तु बालस्येदमकर्तव्यमिति भाति' इति.

श्रुत्वा चेदं स्वपुत्रस्य शिवराजस्य भाषणं शहाजिराजा निभृतं परं मुमुदिरे. यतन्ते प्रथमत एव स्वतंत्रं राज्यं स्थापयितुमिच्छतीति मया पूर्वमेव निवेदितं. तथापि लौकिकीं रीतिमनुसरन्तस्ते पुनरूचुः-वदन्-वत्स! शिवराज! त्वदुक्तं सर्वमेव सत्यं तथापि साम्प्रतं सर्व एव दक्षिणापथवर्तिनः [illegible] तत: पारितोषिकलाभेच्छया स्वकर्तव्यानि साधयन्तः साभिनिवेशं प्रयतन्ते. यदि कश्चित् स्वामिनः स्वातन्त्र्यमाकर्ण्य तदा ते तं सहसा नाशयन्ति. पारतंत्र्येण यवनाधिपान् साहाय्यं यान्ति. तदस्मिन् समये पितृपितामहवचनानां त्यक्तं विधाय यदि त्वं स्थास्यसि तदा सुखं लप्स्यसे. अन्यथा वर्तमानमपि विनाश्य महादुःखमनुभविष्यसीति.

वाचका:! इत्थं यद्यपि कालानुरूपं शहाजिराजा: शिवराजमुपादिशन् परन्तु यवनानां शासनाधिकारिण: शिवराजो न तेनोपदेशेन सन्तुष्ट: स्वकर्तव्यपरांमुखो बभूव. इदमेव लौकिकानां बुद्धौ प्रमाणं. ये चासाधारणा जनास्ते स्वकर्तव्यं स्वयं निश्चित्य तस्मिन् प्रवृत्ता न कस्याऽपि उपदेशेन प्रवर्तन्ते निवर्तन्ते वा. अतएव 'मूढ: परप्रत्ययनेयबुद्धि:' इति साधारणानां लक्षणं. अस्तु. प्रकृत-

मनुसरामः. शहाजीराजाअपि राजसभागमने प्रतीपमतिं स्वपुत्रमालोक्य तूष्णीं तस्थुः, परन्तु विजापुराधीशः प्रतिदिनं तान् स्वपुत्रानयनार्थमवदत्. तेन चिन्ताकुलास्ते जिजादेवीं सर्वं वृत्तं कथयामासुः सा च महता प्रयत्नेन केवलं राजसभागमनार्थं शिवराजमनुकूलं चक्रे. ततश्च पित्रा सह राजसभां गतः शिवराजः पितृस्त्रियनाधिपमनत्वा साधारणगीतिमनुसृत्यनरजनवन्नमन्. यवनाधिपोऽपि शिवराजस्य तेजस्विनीमाकृतिमालोक्य पार्श्वे पितरम् 'कोऽयं' इति संभ्रममुक्त्वम-पृच्छत्. सोऽपि सशङ्कितमानसं पुत्रः शिवराजनामेति निवेदयामास.

शहाजीराजास्तु स्वस्वामिनश्चैव स्वभावं तथा छिद्रान्वेषणतत्परान् स्वशत्रूंश्च जानन्तः पुत्रस्यामिवाहसत्रकारं मनसिकृत्वा स्वामी मा कुप्यत्विति मनोभया सत्वरं प्राह —स्वामिन्. ? अयं मे पुत्रः कदापि एतादृशीं महतीं राजसभां नापश्यत्. नापि स राजसभारीतिं जानाति तेनेतरजनवदभिवन्दितः स्वामी. इमं बालस्यापराधं दीनदयालुः क्षमाशील स्वामी मर्षयत्विति. यवनाधिपोऽपि शिवराजस्य तेजस्वि मुखमंडलं तथा भाग्योदयसूचिकां देहयष्टिमालोक्य सन्तुष्टः तस्मै महार्घाणि रत्नानि तथा वस्त्राणि च वितीर्य विसर्जयामास. शिवराजस्तु गृहमागतस्तानि सर्वाणि विप्रेभ्यो वितीर्य सस्नौ. अथ विजापुराधीशः शिवराजं प्रतिदिनं राजसभामागन्तुमाज्ञापयत्. शिवराजोऽपि तदाज्ञाभंगं पितुरनिष्टकरं मन्वानः कथंकथमपि

राजसभां जगाम. तत्र मार्गे विक्रय्यगोमांसानि पण्यगृहाण्यवलोक्य दुःखाकुलः शिवराज आत्मानं नरकवासिनं मेने. तान् गोघातकान् हन्तुमियेष. परन्तु पितृनियोगनिगडबद्धो न किंचित्कर्तुं पारयते स्म.

एकदा शिवराजः स्वपित्रा समं राजसभां गच्छन् मार्गे कृपाणेन गोः कण्ठं विदारयन्तं कंचन यवनमपश्यत्. तां च गोर्दीनां मुद्रां तथा भयकातरे चाक्षिणी निरीक्ष्य कोपपरीतमानसः शिवराजः पितृनियोगं सहसा समुल्लंघ्य तं यवनं यमालयं प्रैषयत्. तेन कुपिता यवना न्यायालयं गत्वा चुक्रुशुः. परन्तु शहाजिराजस्तेभ्यो तं कालाहलं यवनाधिपो न शुश्राव. यदा च स्थाने स्थाने गोमांसपरिपूर्णानि पण्यगृहाणि द्रष्टुमलभत तदा शिवराजो राजसभागमनमेवामुंचत्, तदा स्वसभायामेकाकिनं शहाजिराजानमवलोक्य पुत्रस्यानागमनकारणमपृच्छत्. समभिज्ञाश्च शहाजिराजा यवनाधिपस्य प्रसन्नमन्तःकरणमवलोक्य विनयेन प्राहुः 'स्वामिन्! आर्या हि गां देवतां मन्यन्ते. तस्या वयमन्तु दुःखाकरोति. राजसभागमनमार्गे च सर्वतो गोमांसविक्रयार्थं पण्यगृहाणि सन्ति. तानि द्रष्टुमपारयन् मम पुत्रोऽद्य राजसभां नाजगाम. स्वामिवाद्या यथा यवनानां तथाऽर्याणामपि. बहवो हि यवना यथा स्वामिचरणान् सेवन्ते तथैवार्यास्तद्वंशजाश्च. अतएवोभयधर्मपरिपालनं स्वामिनाऽवश्यमनुष्ठेयमिति. यवनाधिपोऽपि न्याय्यमेनं निर्णयं निशम्य सन्तुष्टस्तदानीमेव सर्वाणि गोमांसपण्यगृहाणि ततो निष्कास्य नगराद्बहिरवासयत्. घोषयामास च

'यदि कश्चनार्यो राजमार्गे गां धावयन्तं कमपि यवनं गोघाद्धन्यात्तदा तस्य शास्त्रतं न्यायालयान्न भविष्यतीति. एतं राजनियममनुसृत्य नगराद्बहिर्गतेषु गोमांसभक्षयितृषु शिवराजः पुनरपि राजसभामायत्तौ.

एवमेवैकदा शिवराजो जवे पर्यटनार्थं गतो मार्गे गच्छतो ब्राह्मणस्य हन्तुमुद्यतं यवनमपश्यत्. स तु यवनो यत्नान्मत्तो न केवलं तत्रैव ग्रामपञ्जहार किंतु ब्राह्मणं तथाऽताडयत्तथा ब्राह्मणो मूर्च्छितो भूत्वा भूमि पपात. शिवराजश्चेमं प्रकारं दृष्ट्वैव क्रुद्धस्तं यवनं जिघांसया मां मन्मे ब्राह्मणाय वितीर्य दक्षिणामगमत् तत्र.

एतादृशाः प्रकाराः प्रतिदिनमभवन्. तेन च नगरवासिनः सर्वे यवनाः कोपाकुला भिक्षित्वा शिवराजसभार्थमेत्य तं. कतिपये विजापुराधीशं प्रार्थयन्त.

(३)

शहाजिराजाश्च पुत्रस्यैतानि मुखङ्गमानि कर्माणि वीक्ष्य निभृतं मुदितोऽपि तादृशं यवनद्वेषं सर्वानर्थकरं मन्वानाः साध्व्या जिजादेव्या मुखेन तं यवनविषमेवां विधातुं प्रावोधयन्. साध्वी सा माता जिजादेवी यदा तं प्राणप्रियं पुत्रं प्रेम्णा तथोपादिशत्तदा

शिवराजोऽपि विनयेन प्रत्युत्तरयामास. मातः? त्वदुक्तं सर्वमेव सत्यं. बलवन्तः सामर्थ्यशालिनः सार्वभौमा यवनाधिपा इत्यत्र न मे संशयः. बलवता समं दुर्बलेन द्वेषविधानं न नीतिर्नापि श्रेयस्करमि-त्यपि अहं जाने. तथापि दुर्बलान् विप्रानसहायाः स्त्रीर्वा गा वा पीड्यतो यवनानवेक्ष्याहमात्मानमपि विस्मृत्याविचार्यैव तद्धननार्थं चेष्टे. अम्ब! दीनत्राणं नाम क्षत्रियाणांनः परमं कर्म. तद्यदि अस्माभि र्नानुष्ठीयते केवलमौदासीन्यमवलंब्यावस्थीयते तदा दुर्बलानां जगति जीवनमेवासंभवि. किंच मातः? अनेन दीनपालनकर्मणा कुपिता मदोन्मत्ता यवनाधिपा अस्मदीयं ग्रामादिकमपहरिष्यन्तीति नानपादा मां भूयोभूयो वदन्ति, परन्तु अहं वदामि यदि मदीयं कर्म परमेश्वर-स्याभीष्टं स्यात्तदा स तेन कर्मणा सन्तुष्टो मह्यं यवनाधिपानां राज्यान्येव वितरेत्. यो हि न्यायेन सर्वान पालयति तस्य राज्यं भवति नतु बलिष्ठानामपि चौराणां. तस्मान्नानवेन न्यायेन वर्तनीयं. तेनैव कल्याणं भवति. अपिच मातः! यथा मदंमदीयानासा मनात्पूर्वं क्षत्रियकुलसंभूता एव राजान इमां भुवमपालयन्. तेषु च नियमच्यु-तेषु सत्सु परमेश्वरः शासनाधिकारान्नान् प्रत्याख्य तमधिकारं मदंमदीयेभ्योऽदात्, तथा साम्प्रतं पुनरपि नान् दुर्मतिनस्मांश्च सुमतीन् विलोक्य तं शासनाधिकारमस्मभ्यं कुतो न दद्यात्? तस्माद्यदि न्यायेन भारतवासिनः सर्वे क्षात्रेया वर्तिष्यन्ते तदा भारतवर्षे आर्याणां साम्राज्यमवश्यमेव भविष्यति. अम्ब? त्वमेव

विचार्य ! यैः खलु अस्माकं राज्यानि नाशितानि, आर्याणां महिम्नः दासीकृता, धनमुच्चैः भक्षितं, विप्राश्च दूषिताः, क्षत्रियाश्च शूद्रवत् तंसीकृता, सनातनधर्मश्च मर्दितः अगणितैर्विघ्नैरुपायैर्नाशयेषीकृतस्तेषा मेव यवनानां पुरस्ताद्धौ मुकुटीकृत्य श्वाशत्वस्थानं कस्य वा जनयनस्य क्षत्रियस्य संतोषाय भवत् ! कः वा वरकुलीनस्तन्मे स्पृहयेत् ! दृश्यस्योदरस्य कृते एतावान् प्रयासः ! तत्तु यत्रकुत्रचिद्वत्वा यत्किंचिदपि कुर्यां यतः. अन्नमाहरितुं यत्र शूकरावद्रूपादस्य हरिणो भूत्वागतिं न वुध्यहं यत्र वा विध्यासाशाठ्यं क्षत्रियस्य. अहं तु मन्ये यत्र, वरं चर्मकुटीषु शयनं. वरं च रूक्षान्नेन शरीरपालनं. वरं च कंदभोजनं. तथापि स्वातंत्र्येण जीवनं सर्वसुखभाजनमिति. अम्ब ! स्वातंत्र्यभूमिं पारतंत्र्यनरके स्थापयित्वा स्वकीयांश्च दासीकृत्य संपादितं वैभवं यस्य सुखं जनयति स मानवकुलोत्पन्न एव न. अहं तु मन्ये तं कीटं कीटायया नरकाय स्पृहयन्ति तथैवेहशा मानवाधमाः पापेभ्यः कर्मभ्यः. तस्मादीनपालनं क्षत्रियाणां कार्यं न हास्यामि. तदर्थं सर्वं जीवनं यापयिष्यामि. यदि तु मदीयेनानेन कर्मणा पितृचरणेभ्यो वा तुभ्यं वा स्वल्पमपि दुःखं भवेत्तर्हि तावद्धामेतां दूरं स्थापनीय.. तत्रैव स्थित्वा यथाशक्ति लोन्मत्तानामेतेषां प्रतिकारं करिष्यामि. यद्वातद्वा भवतु. अत्र निवसता मया खलु गोहत्यादिकं द्रष्टुमशक्यं. दृष्ट्वा च मनसो नियमनं तु सुदुष्करं. तन्मातः ! त्वमेवेदं सर्वं पितृचरणेभ्यो निवेद्य दरे मां प्रेषयेति.

वाचकाः ! एतेन निसर्गत एव शिवराजस्य स्वातंत्र्यप्रीतिः कथमासीदिति स्पष्टं भवति. बाल्ये यादृशान् संस्कारान् बालो बिभर्ति तादृशसंस्कारशाल्येव सोऽग्रे भवतीति बहुशो दृष्टं. अतएव बलाढ्यान् घनाधिपानगणयित्वा शिवराजः स्वराज्य स्थापयितुं प्रारभत्. एतदर्थ-मेव मयोपलक्षणरीत्यै क्रोडयं भागो वर्णितः

(४)

माता जिजादेवी स्वपुत्रस्यैतां स्वातंत्र्यप्रीतिमवलोक्य सन्तुष्टा मनस्यचिन्तयत्- अहो? भाग्यशालिन्यहं ! यस्यै मत्कुक्षिगुणनिधिरीदृशः सुतः परमात्मना प्रदत्तः. आर्यपुत्राश्च यद्यपि अस्मिन् कर्मणि निभृत-मनुकूलास्तथापि विपरीतफलेऽस्मिन् सर्वथानाशमुत्प्रेक्षमाणा आदा-सीन्येन वर्तन्ते. तस्मादधुना तान् विज्ञाप्य यथाऽयं वर्तते तथैव करिष्यामि इति. विचिन्त्य चैवं सा सती एकदा रहसि शहाजिराजा मित्थं विज्ञापयामास.-स्वामिन्नावत्प्रतिदिनं क्षीयते जनो घोरचिन्ता-मग्ना भासन्ते. यदि च सा चिन्ता शिवराजविषयिणी तदा सा हेया. युष्माकमयमात्मजो यस्मिन् कस्मिन् कुकर्मणि नावत्त प्रवृत्तः किंतु पुण्ये कर्मणि. एते यवना अतिप्रमत्ता सर्वानापे निरतिशयं पीडयन्ति

कदाचित् सकलदीनजनप्रार्थनयाऽऽवर्जितः परमात्मा शिवरूपेणावतीर्य यवनशासनं कुर्यात्? किंच पुरा खलु 'अस्मत्कुले शकस्य कर्ता राजा भविष्यति' इति जगदम्बयाऽशीर्वादो दत्त इति श्वशुरचरणा मामवदन्. तदपि कदाचित् सत्यं स्यात्? सर्वथा यवनाधिपरोषो माभूदिति स शिवराज इतो दूरं स्थले स्थापनीयः. अहं च तेन समं तत्र निवत्स्यामि. यदि च शिवराजः सत्यमेव पराक्रमी भूत्वा शकस्य कर्ता भविष्यति तदा वरमेव. अथ च नैवं तदा तदीयैर्दुर्वर्तनैर्युष्माकं त्रासो न भवेदिति.

शहाजिराजाऽपि साध्व्या जिजादेव्या इदं भाषणं निशम्य तथैव कर्तुं मतिमकुर्वन्. तदानीमेव दादाजिकोंडदेवनामा शहाजिराजानां परमविश्वासपात्रं सेवकः कोशवितरणाय विजापुरनगरमाययौ. तेन समं शिवराजं पुण्यपत्तनं प्रेषयितुं कृतनिश्चयास्ते तमेकान्तेऽवदन्. विप्रवर! त्वमासे मे द्वितीयं हृदयं मदीये शिवराजे केचनालौकिका गुणा दृश्यन्ते. स्वातंत्र्यप्रीतिश्च. तत्त्वं सुशिक्षणदानेन तं तथा संस्कुरु यथा बद्धमूला नैसर्गिकी स्वातंत्र्यप्रीतिर्महाफला भवेदिति.

स च विप्रवरः सेवकः शिवराजेन समं मातरं जिजादेवीं गृहीत्वा विजापुरनगरान्निर्गत्य कतिपयदिवसैर्विप्रकृष्टं पुण्यपत्तन-

माजगाम. तत्र च महान्तं सौधं निर्माय तस्मिन् मात्रा समं बालं केसरिणमपि शुभोदर्के शिवराजमस्थापयत्. शिवराजोऽपि सर्वतः प्रसृतैस्वर्गस्थायाः स्वातंत्र्यदेव्या अवतरणाय कृतैः सोपानैरिव सह्याचलस्य शिखरैः, प्रकृतिसरलैः पार्वतिमु र्निवासिजनैः, स्वधर्म-निरतैर्विप्रवरैश्च, संतोषितः स्वकीयां स्वातंत्र्यप्रीतिं पोषयामास. स्वामिभक्तो दादोजिकोंडदेवस्तथा माता जिजादेवी महता प्रयत्नेन सावधानेन च तस्य मनः शिक्षणेन संस्कृतं विधातुं प्रायतेताम्. बान्धवाः! सर्वस्य भाविनः कार्यस्य निदानीभूतं कीदृशं शिक्षणं शिवराजेन बाल्ये लब्धं. केन वा तत् प्रदत्तमिति वयमग्रिमप्रकरणे निरूपयिष्यामः



५ शिक्षणम्.

१ शिक्षणस्य सामान्यं स्वरूपं

२ धार्मिकशिक्षणे गुरुणां जिजादेवी.

३ व्यावहारिकशिक्षणे च गुरुर्दादाजीकोंडदेवः.

४ दृढोद्योगित्वे पितृचरणाः श्रीशहाजिराजाः

५ नानाविधयुद्धसन्नाहे च यवनगजधानीनिवासः

(१)

वाचकाः ! सामान्यतोऽस्मिन् जगति ये खलु लोकोत्तरकर्मकारिणो मानवपुंगवा जातास्तेषां चरित्राणां सूक्ष्मया दृशाऽन्वालोचने तस्य कारणं प्राधान्यन शिक्षणमेवेति प्रतिभाति. इदं शिक्षणं पाठशालाभ्य एव लभ्यते नान्यत इति न कदाऽपि मन्तव्यम्. ये खलु स्वनामाक्षराणि लिखितुमपि न प्रभवान्त तैरपे सुदुष्कराणि कृतानि कर्माण्यवलोक्य विद्वांसो विस्मयन्ते. योऽयं प्रासिद्धो दिल्लीश्वरो मोंगलकुलदीपोऽकबरनामा यवनराजोऽभूत् स स्वाभिधानवर्णानपि लिखितुं न प्राभवदिति प्राचीनेतिवृत्तज्ञा वदन्ति. यद्यपि यादृशं

शिक्षणं पाठशालायां न दीयते तादृशमपि शिक्षणमन्यत एव लभ्यते तथापि तत्र कारणं खलु परिस्थितिरेव. परिस्थितिश्च गुरूणामपि गुरुः, पाठशालानामपि पाठशाला. यदि नैवं तदा कथयत ग्रीष्मे वस्त्राणि त्यक्तुं कः पाठयति शीतकाले च परिधातुं. सज्जनाः! सर्वत्र लोके सर्वासु चावस्थासु यथार्थशिक्षणस्य दात्री परिस्थितिरेव. अस्या एव परिस्थितेर्यथार्थाभ्यासार्थं स्थापिता इमाः पाठशालाः. तस्माद्यस्य यथार्थशिक्षणसंपादनेच्छा स्यात्तेन प्रथमं सावधानतया परिस्थितेरेवाभ्यासः कर्तव्यः. अस्तु. सक्रेटीसकन्फ्यूशीयसशाक्यमुनिप्रभृतयो ये साधुवर्या अजायन्त ते न कुत्रापि पाठशालायां शिक्षिताः प्रत्युत स्वीयकुशाग्रमत्या सकलेऽपि परिस्थितिर्वक्ष्य तैरीदृशा ग्रंथा लिखिता यान साम्प्रतिका विद्वांसो न मुञ्चन्ति. प्रियवाचकाः! नाहमनया युक्त्या पाठशालानां निरर्थकत्वं प्रतिपादयामि किंतु यथार्थशिक्षणं परिस्थितिनिरीक्षणमेव जायत इति. प्रकृतमनुसरामः.

सा च परिस्थितिः सर्वत्रैव द्विविधा दृश्यते. धार्मिकी राजकीया च. तत्र धार्मिकी चित्तसंस्कारादिना परलोकमुपकरोति राजकीया च केवलमैहिकस्वास्थ्यकारिण्येवेति साम्प्रतिका वदन्ति. वस्तुतस्तु-धार्मिक्यपि परिस्थितिर्नीतिमूलत्वादिभिर्हेतुभिरैहिकस्वास्थ्यमुपकरोत्येव. तथा राजकीयाऽपि स्वास्थ्यं सङ्कल्पद्वारा परलोकमुपकरोत्येव. अतएव प्राचीनैर्मुनिवरै राजधर्माचरणेनापि मोक्षप्राप्तिः प्रतिपादिता. तस्माद्वि-

शेषरूपेण फलभेदोपपादनं नोचितम्. सामान्यतस्तादृशभेदकरणे न कोऽपि दोषः.

तत्र धार्मिकी परिस्थितिर्द्वितीयपरिस्थितेः कारणतया प्रथमतो निर्दिष्टा. उचितमपीदं. यतो राजा नाम प्रजासमष्टिरूपा व्यक्तिः. यथा हि सभानियमपरिपालनार्थं तत्रस्थैरेव सभ्यैः सर्वानुमत्या कश्चन विद्वान् स्वपुरोगः क्रियते तथैव यदा न्यायेन स्वपालनार्थं प्रजाजनाः कांचन सद्गुणशालिनीं व्यक्तिं सर्वानुमत्या स्वीकुर्वन्ति तदा तां राजत्वेन व्यपदिशन्ति सर्वे जनाः. एवंस्थिते तादृशव्यक्तिनिर्णयार्थं प्रथमतः समुदायप्रविष्टा जनाः सुशिक्षिताः अपेक्षिताः. अन्यथा चौरग्रामे सर्वैश्चौरैर्मिलित्वा स्वपुरोगत्वेन निर्गीतः कश्चन महाचौरो राजपदवाच्यो भवेत्. नैवमस्ति. तस्मात् धार्मिकसंस्कारसंस्कृता जना यं स्वाधिपं मन्यन्त स एव राजपदवीभाक् स्यात्. तथा च राजकीयपरिस्थितेः कारणं धार्मिकी परिस्थितिरिति अर्थादेव सिद्धं. सा च यदि समीचीना तदा राजकीया परिस्थितिरपि समीचीनैव भवति.

धार्मिकी परिस्थितिस्तु तदा समीचीनेत्युच्यते यदा मानवा परस्परं बन्धुभावेन वर्तन्ते, यदा परस्परं दुःखपरिहारपरा भूतदयया वर्तन्ते. एतदुक्तं भवति—आध्यात्मिकी परिस्थितिरेव धार्मिकपरिस्थितिशब्देनोच्यते. दृष्टचरं चैतत्. यदा हि राष्ट्रघटकानां जनानां चेतांसि कुसंस्कारैर्दूषितानि भवन्ति तदानीं तदखिलमपि राष्ट्रं बलाढ्यमपि

राजयक्ष्मजर्जरीकृतं कलेवरमिव क्रमेण नश्यति. अतो वर्धिष्णुना राष्ट्रेण वा तत्स्थजनसमुदायेन वाऽऽध्यात्मिकशक्त्यपरपर्याया धार्मिकी शक्तिः प्रथमं संपादनीया.

किंच–कस्यापि कार्यस्य सिद्धौ तत्कर्तुरात्मनि विश्वास-आवश्यकः. यो हि आत्मन्येवाविश्वस्तः स कथं परस्मिन् विश्वसेत् ? जगति य भूतदयाप्रकारास्तथा नीतिप्रकाराश्च समुपलभ्यन्ते, ग्रंथेषु च तेषु तेषु लिखितास्तेषां सत्यत्वमात्माभिप्रायेणैव वक्तव्यम. तथा च यस्य चित्तं न सुसंस्कृत स मलिनचित्तः कथं मलिनदर्पण आत्म-प्रतिबिंबमिव स्वचित्ते वर्तमानां सद्सद्विवेकबुद्धिमुपलभेत ! कथं च तदनुकुलं वर्तेत ! अतः केनापि भव्येच्छुना प्रथमतः साधुशीलसंपा-दनाय धर्मशिक्षणमवश्यं ग्राह्यं. वाचकाः ! यः खलु परस्त्रीषु मातृ-वदवर्तत, परकीयेषु बन्धुभावेन, परद्रव्येषु निरासक्त्या, तेनास्मच्च-रित्रनायकेन कीदृशी धार्मिकी शिक्षा संपादिता, तन्मात्रा च तस्मै कीदृशी दत्तेति विचारयामः

(२)

साध्वी माता जिजादेवी प्रत्यहं रामायणमहाभारतादीनि धर्मेतिहासप्रधानानि पुराणान्यशृणोत्. तदानीं सा प्रथमतः 'रावणा-दीनां परस्त्रीच्छलप्रमुखानि कुकर्माणि कथयित्वा पश्चाद्विलिख्याप्यि

रावणस्य केवलं वनवासिना रामेण वानरसाहाय्यं लब्ध्वा कथं पराजयः कृतः ! सकलसामर्थ्यसंपन्नानां संख्ययाऽप्यधिकानां कौरवाणां द्रौपदीच्छलेन कथं समूलं नाशोऽभवत्. अनाथाश्च पाण्डवाः सत्यपक्षतया भगवताऽनुगृहीताः कथं व्यजयन्त, दुर्बलानां पीडने तद्रक्षणार्थं कथं भगवान् स्वयमवतरति' इत्यादीनां कथानां कथनेन बालस्य शिवराजस्य चेतः सुसंस्कृतं चक्रे. सज्जनाः ! इतिहासो नाम मूर्तिमती यथार्थज्ञानदायिनी पाठशालैव. ततो हि भिन्नभिन्नप्रकृतीनां जनानामुदयविनाशास्तथा तत्कारणानि च ज्ञायन्ते. इदं च महत्तरं कर्म कृतं मात्रा जिजादेव्या यत् प्रथमतो बाल्ये एवाविकृतं श्रीशिवराजस्य चेतस्तया पुण्याभिः श्रीरामचंद्रादीनां कथाभिः पवित्रीकृतम्.

किंच–माता जिजादेवी खलु जाधववंशसमुत्पन्नाऽऽसीत्. तत्कुलपूर्वजा देवगिरिदुर्गे स्वतंत्रा राजानो राज्यमकुर्वन्. तांश्च हत्वा तदानीं स्नुषाऽपि यवनैर्बलाद्दासीकृतेति सर्वं प्राचीनं वृत्तं सा सम्यग्जानात्. तथैव स्वपतेर्निजामशाहीराज्यरक्षणे दुःखानि, स्वस्य कारागारवासं, स्वबन्धोस्तथा स्वपितुश्च निष्कारणं घातं प्रत्यक्षं पश्यन्ती सा परं यवनानद्वेट्. इदं सर्वं स्वकुलवृत्तं बालाय शिवराजाय निवेदयन्ती तत्पुरतो दुःखोद्रेकमसहमानाऽश्रूणि मुंचन्ती सा बालमपि शिवराजं दुर्मदयवनस्वभावज्ञमकरोत्.

अपिच–ये विशेषतः प्रकृत्यैव पापविमुखास्ते•या दुर्बलपीडनं न रोचते. यदि तेषां पुरतः कश्चन बलोन्मत्तो दुर्बलं पीडयेत्. तदा ते स्वात्मानमेव पीडितं मन्यन्ते. यथा हि पीड्यमानः स्वप्राणानपि तृणीकृत्य तत्प्रतीकाराय प्रयतते तथैव तेऽपि. निसर्गत एव पापविमुखः शिवराजा यदा बलोन्मत्तैर्यवनैः पीडितान विप्रान वाऽन्यमहिलावाऽपश्यत्तदा तान यवनेभ्यो रक्षितुं प्रायतत. तद्वदेवास्य दुर्बलत्वेऽपि सत्यपक्षपातित्वं जगम्येव मनाऽपि स्वामिकल्पितप्रभं भविष्यतीति बुद्धस्तस्मिन्नतस्तं विश्वासमजनयत्.

अन्यच्च–लब्धस्वास्थ्या विलासमग्ना यवनाधिपा यथेच्छं धनमुपादनार्थं प्रजा अपीडयन्. तेषां स्वैरवर्तनैः सार्वत्रिकेऽप्यत्रस्थे निर्धना साधवः क्षत्रियश्रेष्ठाः! सतो यवनाश्चार्यमहिलार्थं नरेशान्. ग्रामान् भूमिसात्कुर्वन्तो देवतानां मूर्तीर्विदारयन्तो बलादेव ग्रामगान् यवनान् व्यधुः. तेन दुःखिताः प्रजाजनाः सर्वत्र यथाशक्ति प्रतीकारमारभन्त. तत्रैव केचन साधवो नाम मृत्वा निर्भयं लोकसंघान्निर्माय जागृतिं चक्रुः. वाचकाः! सर्वदा शिवराजसमये यवनत्रासवारणार्थमीश्वरं सर्वेऽपि प्रार्थयन्त. तेन धार्मिकी शिक्षा प्रायः सर्वत्रैव प्रावर्तत. एवंक्रमेण सर्वत्र प्रचलिताया धार्मिकपरिस्थितेरदृश्यमेव श्रीशिवराजस्य चेतसि परिणामः संवृत्तः. तत्रापि माता जिजादेवी श्रीशिवराजं प्रकृत्यैव सद्गुणशालिनं स्वभाग्यनिचयं मन्वाना तदीयं चेतो

दुर्वर्तनादिभिर्यथा दूषितं न भवेत् यथा च धार्मिकशिक्षणेन नीतिसंस्कारान् धारयेत्तथैव प्रत्यहं सावधानेनाचेष्टत. अतः शिवराजस्य धार्मिकशिक्षणे माता जिजादेव्येव गुरुर्नान्य इति सर्वेऽपि वदन्ति. श्रीरामदासस्वामिनस्तु तामेव नीतिमत्तां सदुपदेशनावर्धयन्निति न ते प्रथमगुरवः.

(३)

यथा हि सर्वेषां जनानां कृते धार्मिकं शिक्षणमावश्यकं तथैव व्यावहारिकमपि. ये खलु संसारे व्यवहरन्ति तेषां केवलेन धार्मिकशिक्षणेन कार्यसिद्धिर्न भवति. यतः संसारो नाम विविधविचित्रचित्तवृत्तीनां जनानां महत्स्थानम्. तत्र हि केचन सज्जनाः, केचन दुर्जनाः, केचन भीरवः, केचन चौरा, इति नानाविधाः प्राणिनो व्यवहरन्ति. तेषु च परानिष्टमकुर्वता स्वानिष्टं च परिहरता जनेन वस्तव्यमिति परं दुष्करं कर्म. एतदर्थं हि सज्जनेनापि व्यवहरता स्वयोगक्षेमायावश्यं व्यावहारिकं शिक्षणं ग्राह्यमेव. तच्च व्यावहारिकं शिक्षणं तत्तद्व्यवहारानुरोधेन भिन्नं भिन्नं भवति. यथा हि पाठशालासु पठतां विप्राणां शिक्षणं, तथैव न क्षत्रियाणां नापि वैश्यानां. श्रीशिवराजश्चापारवीर्यसंपन्नानां युद्धकलाकुशलानां क्षत्रियाणां सुप्रसिद्धे वंशे समुत्पन्न इति तदीयं व्यावहारिकं शिक्षणमपि क्षत्रियकुलोचितमेव बभूव.

यदा हि शहाजिराजा. स्वपुत्रं बालं शिवराजं दादोजिकोण्ड-देवाय विनीय पुण्यपत्तनं गन्तुं तमाज्ञापयत् तदाप्रभृत्येव स स्वामि-भक्तः सेवकः श्रीशिवराजाय क्षत्रियोचितं शिक्षणं दातुमारभत. तत्र प्रथमतः सर्वेषां शस्त्राणां निक्षेपाम्बधा परीक्षितव्यस्तेभ्य. स्वरक्षणं शिशिक्षे.शिवराजोऽपि वंशपरंपरासंपादितक्षात्रसंस्कारोऽचिरादेव तस्मिन् सर्वस्मिन्नपि कर्मणि अद्वितीय कुशलो बभव प्रायस्तस्मिन् काले सर्वस्मिन् सह्याद्रिप्रदेशे शूरा एव महाराष्ट्रीया व्यराजन्. दक्षिणाप-थवर्तिषु महंमदीयराज्येषु प्राबल्येन योद्धारो महाराष्ट्रिया एतासन्. अतएव तेषां सेवका वा पुत्रा वा स्त्रियो वा सदैव शस्त्रग्रहेऽग्रगाहे वा कुशला एव. शिवराजश्च शिक्षितोऽचिरादेव तेषु सर्वेषु अद्वि-तीयो बभूव.

अथ स्वामिकार्यदक्षः श्रीदादोजीकोण्डदेवो यदा स्वस्वामिपुत्रं क्षात्रविद्याकुशलमपश्यत्तदा राज्यपालनोपयोगि द्वितीयं शिक्षणं तस्मै दातुं प्रचक्रमे. वाचकाः ? यथा हि युद्धादिना शत्रुजय आवश्यकस्तथैव जिताया भूमेः पालनमपि. तच्च पालनं प्रजास्वास्थ्यमूलकं. प्रजा-स्वास्थ्यं च न्यायविधानेन दुष्टदमनेन शिष्टानुग्रहेण व्यवस्थितकर-ग्रहणेन संभवति नान्यथा. यो हि राजा यथेच्छवर्तनः कोशद्रव्यं व्ययीकृत्य पुनरपि द्रव्यलाभार्थं नानाविधान् करान् स्थापयति तस्य सर्वा प्रजा करदानत्रस्ता संभूयोत्थिताऽवश्यमेव तं राजानं राज्यात् प्रच्यावयति. तस्मात् प्रजाभ्यो गृहीतः करस्तासामेव कल्याणार्थं

व्ययीकरणीयो नास्त्येवेति राजनीतिविदो मन्यन्ते. अज्ञाकल्याणमेव स्वकल्याणमिति राज्ञाऽवश्यं भावनीयं. यथा हि कुटुंबस्थं पालकः स्वीयकुटुंबपोषणे सदैव तत्परो भवति, स्वं च तदभिन्नं मन्यते, तत्सुखदुःखे आत्मीये एव मनुते. तथैव राज्ञा प्रजासु भाव्यं. अस्तु. इदं च शिक्षणं दादोजिकोंडदेवेन श्रीशिवराजाय दत्तं. वाचकाः ! श्रीशहाजिराजस्यन्तर्धायकर्मणस्तु [illegible] विजापुरसार्वभौमेना सोऽयं देश- [illegible] नायिषीत्साकमग्रा [illegible] ग्राम. केवलं पत्नीवासिनां विरुद्धा ग्रामटिका एव. अतो च श्रीशहाजिराजैः स्वभृत्यानर्थार्थं स्थापितो दादोजिकोंडदेवस्तान् प्रति सदा दुर्गमो बाधुकेभ्यः पारितोषिकाणि विनार्य वन्यपशून् व्याघ्रादीन् मारयामास. तथैवान्यप्रदेशेभ्यः कृषीवलानाहूय भूमिं संस्कार. संकृत. सुस्थिता चैव भूमिः परं फलप्रदाऽभूत्. दादोजिकोंडदेवः स्वप्रजानां रक्षणार्थं स्थाने स्थाने न्यायालयान् स्थापयामास. तेषु च स्थित्वा यदा दादोजिः स्वयं कार्यं नाशक्नोत् तदा शिवराजं स्वसन्निधौ स्थापयित्वैव निर्णयमकरोत्. तेन च शिवराजो न्यायकर्मण्यपि कुशलोऽभूत्. दादोजीकोंडदेवस्तु प्रकृत्यैव कियान् न्यायी आसीदित्यत्र प्राचीनाः कथां कथयन्ति.

एकदा श्रीशिवराजेन समं दादोजी राजकीयान्युपवनानि द्रष्टुं जगाम. तत्र विविधानाम्रफलभरावनम्रान् सहकारान् पश्यन्

एकं पक्वं फलं जग्राह. अथ तस्मिन्नेव क्षणे स्वामिनियोगं विना तदीयं फलग्रहणमन्याय्यं मन्वानः स स्वकीयं हस्तं छेत्तुं सेवकमाज्ञापयामास. यदा च सेवकस्तथाकर्तुं नांगीचक्रे तदाऽगत्यांऽगरक्षस्यैकं बाहुं रिक्तमवास्थापयत्. ततः कतिपयदिनैः कोशवितरणार्थं विजापुरनगरं गतः स स्वयं शहाजिराजैः पृष्टः सर्वं वृत्तं न्यवेदयत्. तन्निशम्य तदीयस्वामिभक्त्या तुष्टाः श्रीशहाजिराजास्तस्मै बहु पारितोषिकं दत्वा सत्कारयामासुः. अस्तु. एवंविधा परमस्वामिभक्तास्तस्मात् शहाजीक्रोडदेवात् सर्वमेव व्यवहारोपयोगि राजशिक्षणं लब्ध्वा श्रीशिवराजः परमचतुरो बभूव. वाचक.[1] धार्मिकशिक्षणेन सुसंस्कृते चतसि व्यावहारिकं शिक्षणं तथा दृढयत्नसमन्वयेन शिवराजो राजनीतिप्राविण्यमद्वितीयमलभत.

४

बान्धवाः[2] बहवो हि नीतिमन्तो व्यवहारकुशलाअपि नरा न महान्ति कार्याणि कर्तुं प्रभवन्ति. तत्र च कारणं तेषां दृढोद्योगित्वाभावएव. प्रायः साधारणा जनाः किंचित्कार्यमारभ्य विघ्नैः पराहताश्चलां विरमन्ति न पुनर्विघ्नप्राप्तिद्विगुणितोत्साहा महतोत्साहेन तदेव कार्यमारभन्ते. इह जगति विरलास्ते ये पुनः पुनर्विघ्नसंतत्या पराहताअपि अभग्नोत्साहा आरब्धं कार्यं समापयन्त्येव. अतएव "प्रारब्धमुत्तमजना न परित्यजन्ति" इतिवचनोक्तं तेषामेवोत्तमजनत्वं. ईदृशान्येव नरर-

त्नानि जगति लोकोत्तराणि कार्याणि कुर्वन्ति. यद्यपि पूर्वोक्ते द्वे अपि शिक्षे महाफले परमावश्यके तथापि दृढोद्योगित्वं विना न ते स्वफलं दातुं शक्नुतः. यथा चात्युत्तमविन्यासमपि देवालयं शिखरग्रहितं निष्फलं भवति तथैव दृढोद्योगकारित्वेन रहितं एतेअपि शिक्षे. सज्जनाः ? संसारे खलु कस्याऽपि कार्यस्य सिद्धिर्विघ्नैर्विना न भवत्येव. यो हि सांसारिको जनः स स्वकमेव चरणप्रभृतिभिर्विघ्नैराक्रान्तस्तदा तदारब्धं कार्यं विघ्नैराक्रान्तमिति किमु वक्तव्यं. एवंस्थिते विघ्नपराभूत्या प्रारब्धकार्यान्निवर्तनं न पौरुषं प्रत्युत तान् विघ्नान् दूरीकृत्य प्रारब्धकार्यस्य समापन एव. अत्र च गुरुः पूर्वेतिहास एव. ये हि लोकोत्तराः पुरुषा जातास्तेषां चरित्राणि तथा कार्याणि चेतिहासे लिखितानि बालको यदा पठति तदा स्वपूर्वजानां लोकोत्तरकार्यविधाने कियन्तो विघ्नाः समागच्छन् कथं च ते तान्विघ्नानपाह्य समारब्धानि कार्याणि समापयन्निति सर्वं वृत्तं जानात्येव. तेन संजातधैर्यः स प्रारब्धे कार्ये सहसा विघ्नैरतिऽपि महता धैर्येण तत् समापयत्येव. वाचकाः ? इदमेवेतिहासशिक्षणस्य फलं. शिवराजश्च महाभारतप्रभृतीनितिहासग्रंथान् पपाठैव. तथापि दृढोद्योगित्वं तु तदीयाः पितृचरणा एव गुरव इत्यत्र न संदेहलवोऽपि. तैः खलु निजामशाहीराज्यस्य पालनार्थं कथं प्रायति, कथं च दिल्लीश्वरेण समाक्रान्तेऽपि निजामशाहीराज्ये धैर्यमविहाय पुनरपि स्वतंत्रराज्यस्थापनार्थं प्रयत्नः कृतः, कथं च तस्मिन्नुद्यमे निष्फले पुनरपि विजापुराधीशमाश्रित्य कर्णाटकविभागे

महतोत्साहेन स्वतंत्रराज्यस्थापनार्थमुद्योगः कृत इति सर्वत्रेतिहासे प्रसिद्धमेव. इदं च सर्वं वृत्तं जानन्ती माता जिजादेवी शिवराजाय सर्वमकथयत्. अनेनैव कारणेन श्रीशिवराजोऽल्पबलोऽपि बलिष्ठैराक्रान्तसमस्तभारतवर्षैर्यवनचक्रवर्तिभिः समं युयुधे. लेभे च यशः. शिवराजस्य दृढोद्योगकारित्वे सन्ति बहूनि निदर्शनानि. यानि क्रमेणाग्रे स्फुटीभविष्यन्ति.

५

वाचकाः ? एतावत्कालपर्यन्तं निरूपितं सर्वमपि शिक्षणं बौद्धमेव नानुभवात्मकं. बौद्धं हि शिक्षणं सर्वव्यवहारनिदानमपि अनुभवात्मकशिक्षणेन विना कार्याय न समर्थं भवति. यो हि बौद्धं शिक्षणं लब्ध्वाऽऽत्मानं विद्वांसं मन्यमानोऽनुभवात्मकशिक्षणग्रहणे समुदास्ते स प्रायेण प्रसंगे कर्तव्यमूढ एव भवति. तस्मात् सामान्यतो ज्ञातव्य कस्याऽपि विषयस्यानुभवात्मकं ज्ञानमेव कार्यकारीति सिद्धं. इदं च शिक्षणं श्रीशिवराजो यवनराजधानीनिवासात्प्रेम. यदा च बाल्ये शिवराजः स्वपितुः समीप आस तदा निसर्गत एव तत्प्रज्ञः सर्वं युद्धसाधनमन्वाहं तथा सामदानभेदादीनां प्रयोगान् प्रत्यक्षमन्वभूत्. विजापुरनगरस्य राजधानीतया तत्र कृत्स्ना एव सैन्यविभागा आसन्. श्रीशिवराजः प्रायः प्रतिदिनं ' शतशोऽसृहः कथं क्रियते ! कथं च सादिमण्डलस्य कृते समीचीना अश्वा उत्पाद्यन्ते ? कथं च

पदातिविभागो युद्धाशिक्षणं दत्वा पटुः क्रियते ! कथं स्फोटकद्रव्याणि उत्पाद्यन्ते ? कथं सेनाविभागानां भिन्नानि भिन्नानि शस्त्राणि विरच्यन्ते. कथं प्रवृत्ते दीर्घकालिके युद्धेऽखण्डानि धान्यागाराणि स्थाप्यन्ते ? कथं च दुर्गाणि निर्मीयन्ते ? कथं चाराः स्वस्वकर्मनिपुणा विधीयन्ते ? कथं च कोशाः संगृह्यन्ते' इत्यादिकं सर्वमेव साक्षादपश्यत्. तेन स परं प्रवीणोऽभूत्. यथाहि श्रीशिवराज इदं युद्धशिक्षणं [illegible] सामादीनां चतुर्णामप्युपायानां प्रयोगज्ञानमपि. स [illegible] जनानां जनाग. तत्र च विविधा विरुद्धमतयो नाना [illegible] जना आसन्. ये खलु महत्वाकांक्षिणो जनास्तेऽन्यान् स्वसदृशान् द्विषन्त्येव. तथा च ते कथं परस्परं सामादीनुपयुञ्जते, कथं गूढचारैः स्वद्वेषिणां वृत्तज्ञानार्थं प्रयतन्ते, कथं स्वस्वामिचित्तानुकूल्यार्थं जाग्रति, कथं च बलिष्ठानपि स्वशत्रून् युक्त्याऽतिवर्तन्ते, कथं संघीभूय कार्याणि कुर्वन्ति, कथं च स्वाभीष्टसिध्यै स्वजीवितमपि तृणीकुर्वन्ति, कथं स्वेष्टसाधने जागरूका भवन्तीति सर्वं भाविकार्योपयोगि शिक्षणं शिवराजो यवनराजधानीनिवासादेव लेभे.

स्वराज्यस्थापनाकारणानि

१ निसर्गतः प्रदेशस्य दुर्गत्वम्.

२ यवनानां दुर्बलसंतुष्टा बलिनः

३ पार्वतीयजनानां निरतिशयं विश्वासपात्रत्वं.

४ यवनानां राज्येऽन्तःकलहाधिक्यम्.

५ मातुरुत्साहातिशयः

१

वाचकाः ? इह जगतीतले यानि खलु साधारणानि वाऽसाधारणानि वा कार्याणि जायन्ते तेषां दृष्टानि वा सूक्ष्माणि वा कारणानि भवन्त्येव. नहि कारणं विना कस्याऽपि कार्यस्योत्पत्तिरस्तीति दृष्टचरं. तथाच या खलु मत्तोऽस्य स्वराज्यस्थापनाऽभूतपूर्व्याः कारणानि कानीति वयं विचारयामः. फलं चास्य विचारस्य तेषां ज्ञानमेव. अस्तु. यद्यपि पुरा निरूपिता परिस्थितिः कारणमत्र भवितुमर्हति तथापि सा यवनपीडात्मिका कृत्स्नेऽपि भारतवर्षे समा-

नैवासीत्. प्रत्युत यावद्धि आर्यावर्ते यवना दुर्वृत्ता आसंस्तावन्न महाराष्ट्रे. ये खलु दिल्लीश्वरप्रभृतयो यवना अजायन्त ते च साक्षादेव महंमदीयवंशजाः. महाराष्ट्रे तु ये खलु विजापुराधीशप्रमुखा यवनराजा आसंस्ते च सनातनधर्मानुयायिवंशजा बलादेव महंमदीयाः कृताः. ततएव च ते आर्यधर्मानुयायिभिः समं विवाहादिकमप्यकुर्वन्. योऽयं विजापुरराज्यस्य प्रथमः स्वामी 'युसफआदीलशहा' नामा, स खलु मुकुन्दरावनाम्नः शूरस्य महाराष्ट्रियस्य भगिनीं परिणीतवान्. तस्याश्च पुत्रः पितुः पश्चात् सिंहासनमलंचकार. एवमेव निंबाळकरोपनामा कश्चन महाराष्ट्रियो विजापुराधीशस्य भगिनीमुपयेमे. तात्पर्यमिदमेव–दक्षिणापथवासिनो यवनास्तथा तदधिपाश्च न सनातनधर्मं तदनुयायिनो वा तथाऽद्विषन् यथाऽर्यावर्तवासिनस्ते. आर्यावर्तवासिनो रजपूतकुलसंभवाः क्षत्रियास्तु दुर्दान्तानां दिल्लीश्वराणां त्रासात् स्वात्मजास्तेभ्यः समर्प्यात्मानं ररक्षुः. नैकाऽपि दिल्लीश्वरकन्यका केनाऽपि क्षत्रियेण परिणीता. तस्मादार्यावर्ते दक्षिणापथे च यवनवर्तनेषु भूयान् भेदः. एवंसत्यपि महाराष्ट्र एव स्वराज्यस्थापना कथमभूदिति किं न विचारार्हं ? अस्तु.

सज्जनाः ? अत्र च प्रथमं कारणं महाराष्ट्रस्य नैसर्गिकी रचनैव. कृत्स्नोऽपि महाराष्ट्रदेशो दुर्गमाभिः सह्याचलशिखरमालाभिः परिवेष्टितः, दुष्प्रवेशाभिः पातालं प्रविष्टाभिरिव दरीभिः समलंकृतः, प्रतिशिखरविराजमानैः स्वातंत्र्यदेवीनिवासभवनैरिव स्वातंत्र्यदेवी-

प्रदत्तैः शिरोभूषणैरिवागणितैर्दुर्गैः संकुलः, अपरिच्छिन्नवृक्षराजिपरिमण्डितैर्वनसमूहैः संकटितोऽप्यासि वर्तते. ये खलु प्रायः पर्वतवासिनो जनास्ते प्रकृत्यैव स्वातंत्र्यप्रिया इतीतिहासेऽप्यपि दृष्टचरं. महाराष्ट्रे च सह्यपर्वतमाश्रित्य परकीयशत्रुभ्य आत्मानं तद्वासिनोऽरक्षन्. ये खलु दिल्लीश्वरप्रभृतयोऽपारसैन्यसमन्विताश्चो महाराष्ट्रं जेतुं सर्वथा प्रयतमानाअपि न फलं लेभिरे इत्यत्राऽपि कारणं पूर्वोक्तमेव. ये च वंगामिथिलामध्यप्रदेशप्रभृतयो देशाः सन्ति तेषु तादृशदुर्गमपर्वतानाभावाद्भूप्रदेशस्य समानतया शतघ्नीबलेन सर्वमपि जेतव्यभूविभागं भस्मसात्कुर्वन्तो यवनाधिपास्तांस्तान् प्रदेशानजयन्. स्वायत्तांश्चाकार्षुः. महाराष्ट्रे तु तादृशप्रचण्डशतघ्नीवाहकानां शकटानां दुष्प्रवेश्यतयाऽयं देशो बलिष्ठानामपि यवनाधिपानां दुर्जयोऽभवत्.

(२)

वाचकाः ? निरूपितमिदमेकं कारणं. अपरं च सर्वं भारतवर्षमाक्रम्य लब्धस्वास्थ्यानां यवनाधिपानां दुर्वृत्तैरसंतुष्टा बलिनः.सज्जनाः? केनचिन्मदान्धेन यावद्दीना एव पीड्यन्ते न बलिनस्तावच्च सा पीडा परिपच्यते. नापि तस्याः कोऽपि परिणामो भवति. परन्तु यदा दीनपीडयाऽलब्धदुःखः स बलिष्ठानपि तृणीकृत्य पीडयितुमिच्छति प्रयतते च तदा स सद्यएव स्वीयकर्मणः फलमश्नुते. अयमेव न्यायो यवनानां विषये. यवनाश्च प्रथमतः शनैः शनैर्लब्धप्रतिष्ठा

दीनान् ब्राम्हणान् पीडयन्तोऽचिराद्बलिष्ठान् क्षत्रियानपि पीडयितुमारभन्त. तेन सर्वे एव विमता अभवन्. महाभागाः ? प्रमत्ता यवनाः कथं बलिष्ठान् पीडयामासुरिति संक्षेपेण विचारयामः.

यवनाश्च भारतवर्षे कलहामानान् क्षत्रियराजानलोक्य तेषामेकतमं पक्षमवलंव्यापरं पक्षमनाशयन्. ततश्च तमपि पक्षं नाशयित्वा कुटिलया राजनीत्या कृत्स्नमेव भारतवर्षमात्मसाच्चक्रुः. तथापि भारतवर्षे केचन क्षत्रिया राजस्थानवासिनः स्वातंत्र्येण स्वस्वविभागानपालयन्. तांश्च जेतुं दिल्लीश्वरा असकृत्प्रायतन्त. योऽयं प्रसिद्धोऽकबरनामा यवनाधिपोऽभूत् स द्वादशवर्षपर्यन्तं महाराजं मेवाडाधिपतिं श्रीप्रतापसिंहं जित्वा स्वसामन्तं कर्तुं प्रायतत. न लेभे च यशः. इयं खलु घोरा राज्यतृष्णा सर्वानपि बलिष्ठान् सरोषांश्चक्रे.

एवं स्वधर्मप्रसारं यवनाधिपाः खड्गसाहाय्येन चक्रुः. दिल्लीश्वरप्रभृतयो यवनभूपाला यान् प्रदेशानजयंस्तत्रत्यान् सर्वानपि सनातनधर्मानुयायिजनान् बलादेव महंमदीयान् व्यधुः. यथा हि मानवा मृत्युलोकं पुत्रकलत्रादीन् बहु मन्यन्ते तथैव धर्ममपि. नाहि कोऽपि स्वधर्मं समीचीनं मन्वानस्तं हातुमिच्छति. तथाच ते बलादेव महंमदीयधर्मं ग्राहिता आर्या यवनानद्विषन्.

किंच–अस्मिन्नार्यावर्ते बहूनार्यानेवावलोक्य तान् सर्वान् स्वधर्मानुयायिनो विधातुमक्षमास्तेऽन्यामेव युक्तिमयोजयन्. यो हि

यवनसाम्राज्यवासी अगृहीतराजधर्मा शूद्रो वा ब्राम्हणो वा स्यात्तेन प्रतिवर्षं नियतः करो राज्ञे देय इति. इमामलौकिकीं स्वधर्मप्रसारस्य युक्तिमवेक्ष्य प्रायः सर्वे एवार्या यवनानद्विषुः

एवमन्यदपि बलवत्तरं भारतवासिनां कारणमसंतोषस्य. तच्चेत्थं. प्रायः सर्व एव यवनाधिपा यस्य कस्याऽपि जायां वा कन्यां वा यदा रूपवतीमपशंस्तदा तां विलासार्थं त ऐच्छन्. प्रतिषिद्धायां च तस्यामिच्छायां तां पूरयितुं महान्ति युद्धानि चक्रुः. इदं च स्वस्वामिनां परकान्ताप्रियत्वमवलोक्य सैनिकास्तथाऽधिकारिणश्च तथैवावर्तन्त. तेन प्रजाजना दुःखसागरमग्ना रुरुदुः. इमां च स्वकीयानां दुरवस्थामवलोक्य प्रबला अकुप्यन्. यवनाधिपानां च परकान्ताभिलाषं प्रबलेनाल्लाउद्दीनेन पद्मिन्यर्थं प्रवर्तितं घोरं युद्धं तथा तेनैव विहितं कर्णरायकान्तापहरणं सुतरां कथयति. अस्तु.

अपरं च सार्वभौमा दिल्लीश्वरप्रभृतयो यवनराजाः सत्यं बलाढ्या आसंस्तथापि सदैव तेऽन्तःपुरवासिनीनां राज्ञीनां कलहैरस्वस्थचित्ता एव ! यतस्तेषामन्तःपरे विविधाः स्त्रियो व्यराजन्. संख्ययाऽपि च ताः सहस्रादपि अधिकाः. ताश्च यवनाधिपस्य चित्तं स्वानुकूलं विधातुं प्रयतमाना असूयान्विताः कलहांश्चक्रुः. सामन्ताश्च तासां पक्षपातिनो भूत्वा परस्परं. तेनापि यवनराज्ये स्वास्थ्यं नासीत्.

(३)

पाठकाः? महाराष्ट्रे स्वराज्यस्थापनाया यथा पूर्वोक्तं कारणद्वयं तथा तृतीयमपि सह्यपर्वतवासिनां जनानां निरतिशयविश्वासपात्रत्वमपि कारणमास्ति. यत्र हि स्वल्पलाभलुब्धा जनाः स्वामिनं तथा स्वमातृभूमिं भस्मसात्कुर्वन्ति तत्र नाशाऽस्ति स्वातंत्र्यस्य. स्वातंत्र्यदेवी तत्रैव तिष्ठति यत्र सर्वेऽपि जनाः परस्परं परमप्रीत्या विश्वासेन च वर्तन्ते. इदं च सह्यपर्वतवासिषु मावळेजनेषु परमासीत्. यद्यपि ते दारिद्र्यपीडिता अर्धनग्ना एव, रात्रिंदिवं स्वोदरपूरणार्थं स्वक्षेत्रसंस्कारे मग्ना एव, तावताऽपि क्षुन्निवारणपर्याप्तमपि अन्नं दुर्लभमेव, तथापि तेषां शीलं क्षत्रियेभ्योऽन्यूनमासीत्. ते च यं पुरुषं स्वनायकममन्यन्त तदाज्ञां प्राणात्ययेऽपि नात्यक्राम्यन्. परकान्तासु मातृवद्वृत्तिः, परद्रव्येषु निरासक्तिः, गुणेषु आदरः, स्वाग्रेसराज्ञानुवर्तित्वं, इत्यादयो गुणाः प्राधान्येन तेष्ववृश्यन्त. अन्येऽपि च 'क्षुत्पिपासासहत्वं, शीतोष्णपर्जन्यवातसहनसामर्थ्यं,निरन्तरं वन्यपशुसांनिध्यतः प्राप्तं निर्भीकत्वं, शस्त्रोपयोगपाटवं, अंगीकृतकार्यनिर्वाहकत्वं, सदा गगनभेदिसह्याचलशिखरोल्लंघनेन शरीरसौष्ठवं, विलक्षणं शरसंधानकौशलं, इत्यादयः स्वातंत्र्यसंपादनरक्षणकारणीभूता गुणास्तेषु व्यराजन्त. किं च यथा हि यवनानामतिसांनिध्यत आर्यावर्तवासिन आर्या आर्यशीलाद्भ्रष्टास्तथा नेमे सह्याचलवासिनः. अस्मिन्

प्रदेशे तु तादृशोत्तमनगराभावादतीव विरला यवना आगच्छन्. तेन न ते स्वकीयां परम्परामुंचन्. असत्यभाषित्वं हि राजनीतिपारगैः कर्तव्यत्वेन व्यपदिश्यते. यो हि भूयोभूयोऽसत्यं प्रलपन् स्वभावतः सरलान् जनान् वंचयति स 'राजनीतिचतुर' इति सन्माननीयेन शब्देन व्यपदिश्यते. सज्जनाः ! यस्यां कस्यामप्यवस्थायामसत्यभाषित्वं नाम गर्ह्यमेव. यद्यपि क्षणमात्रं मिथ्यावादस्य शुभं फलं दृश्यते तथापि तज्जाविनोऽशुभात् फलादत्यल्पमिति न प्रामाणिकानां प्रवृत्यर्हं. लौकिका जना सकृद्वा द्विर्वा मिथ्याभाषणेन विप्रलभ्यन्ते परन्तु ततस्ते सत्यवचनेनाऽपि स्वानुकूलचित्ता विधातुमयोग्या भवन्ति. इमानेव मावळेजनानां गुणानवलोक्य श्रीशिवराजो महाराष्ट्रे स्वराज्यं स्थापयितुं प्रायतत.

(४)

वाचकाः? यथेमानि कारणानि तथाऽन्यदप्येकं कारणमस्ति. तच्चेदं - आर्यावर्तदक्षिणापथस्थापितानां भिन्नानां यवनराज्यानां परस्परं द्वेषाधिक्यं, तथा तत्तत्स्थाननियुक्तानां प्रधानाधिकारिणामन्तःकलहश्च. तथाहि - यदा खलु श्रीशिवराजो जिजादेव्या जज्ञे तदा तु आर्यावर्ते मोंगलकुलसंभवः शहाजहाननामा दिल्लीश्वरो राज्यमकरोत्. दक्षिणापथे च कुतुबशाहीआदिलशाहीनामभ्यां प्रसिद्धे द्वे राज्ये आस्ताम्. स च दिल्लीश्वर ऐश्वर्यशक्तिसंपन्नो दक्षिणापथवर्तिनी राज्ये आत्मसात्कर्तुमैच्छत्. तदाधिपौ च तत्प्रतीकारमारभेतां, एवंस्थिते तौ

स्वभावत एव शूराणां महाराष्ट्रवासिनां साहाय्यमैच्छताम्. यदा हि मोंगलकुलसंभवो दिल्लीश्वरो विजापुरराज्यमात्मसात्कर्तुमाययौ तदा विजापुराधीशो विस्मृत्य प्राचीनं द्वेषं शिवराजं साहाय्यविधानाय प्रार्थयत. इमं च यवनराजानां परस्परं द्वेषमालोच्य शिवराजः 'यथैवैभिर्नः पूर्वजानां परस्परद्वेषं निमित्तीकृत्य सर्वेऽपि ते विनाशिताः स्वराज्यं च स्थापितं, तथैवास्माभिरपि एतेषां कलहायमानानां द्वेषं निमित्तीकृत्य कुतो न पूर्ववदेव स्वराज्यं स्थापनीयं' इति चिन्तयामास. अपिच–दिल्लीश्वरप्रभृतयः सर्व एव यवनराजाः स्वज्येष्ठबन्धोर्वा पितुर्वा घातेन सिंहासनमलभन्तेति प्राचीनेतिहासेषु स्पष्टमेव. इमामेव रीतिं राज्यव्यवस्थार्थं स्थाने स्थाने नियुक्ताः सेवकाअपि शीघ्रमेवान्वसरन्. यदा हि कश्चन सेवको महति प्रान्ताधिपपदे नियुक्तः स शीघ्रमेव स तस्य प्रान्तस्य रक्षणाय स्थापितायाः सेनायाः साहाय्यं लब्ध्वा स्वतंत्रो भवितुमचेष्टत. दिल्लीश्वराअपि नीचजनसहायाः स्वामिभक्तानपि दण्डयामासुः. तेन सेवकाअपि स्वामिद्रोहिण एवासन्.

५

बान्धवाः ? यथामति मया महाराष्ट्रस्थानि स्वराज्यस्थापनाकारणानि निरूपितानि. परन्त्वेकं प्रधानं कारणमवशिष्टम्. तदिदं—यद्यपि बहवो जनाः किमपि लोकोत्तरं कार्यं कर्तुं वांच्छन्त्येव, तथापि तदीयाः संबंधिनो नानाविधैरुपायैस्तदुत्साहभंगं कुर्वन्तस्तस्मादुद्यमात्तं निवर्तयितुं प्रयतन्ते. इदं च बहुभिर्दृष्टं समनुभूतं च स्यात्.

परन्तु शिवराजस्य महाभाग्येन वा, कृत्स्नमहाराष्ट्रपुण्येन वा, दुर्मदान्धयवनहस्तपतितानां भ्रष्टपातिव्रत्यानां मृतानां वा सतीनां शापेन वा, माता जिजादेवी शिवराजस्य जनन्यभूत्. माता जिजादेवी नेतरस्त्रीवत् प्रकृत्यैवाबला किंतु धैर्यस्थैर्यनिर्वीरपत्नी वीरमाताऽप्यासीत्. सा तु स्वराज्यस्थापनार्थं शिवराजं तथा प्रोत्साहयति स्म यथा शिवराजः स्वमार्गप्राप्तां विघ्नततिमविगणयन् महान्तमुत्साहमबध्नात्. सज्जनाः ! दिल्लीश्वरप्रभृतयो यवनराजाः समस्तं भारतं समाक्रम्य लब्धप्रतिष्ठा अपारकोशसेनाबला ग्रीष्मभास्करा इव दुर्दर्शा आसन्. तदानीं तैः सह विरुध्य स्वराज्यस्थापनं नाम किंयदुष्करमात्मनाशफलकमिति भवन्त एव विचारयन्तु. एवंस्थितेऽपि स्वकीयमेकाकिनं सुपुत्रं शिवराजमस्मिन् कर्मणि निःशंकं योजयन्ती माता जिजादेवी कथं न स्तुत्यर्हा. अतएव निरूपितेषु सर्वेषु स्वराज्यस्थापनाकारणेषु प्रधानं कारणं मातरं जिजादेवीमेवाहं मन्ये.

सहायलाभः.

१ देशमुखानामैक्यवृद्धिः.

२ मावळेप्रमुखानांविश्वाससंपादनं.

३ स्वमांत्रिणोदादोजिकोंडदेवस्यानुकूल्यं.

४ धनसम्प्राप्तिः

वाचकाः! शिवराजो विजापुरनगरान्निर्गतः पुण्यपत्तनं समागत्य तत्रैवोवास. स चानुभूतयवनराजशासनस्वरूप उद्विग्नमनाः सह्यपर्वतमण्डिते स्वपितृचरणसंपादिते भूविभागे स्वयं वीक्षणमिषेण पर्याटत्. प्रकृत्यैव सरलमतिः शिवराजो मध्यान्हकाले कस्मिन्नपि ग्रामे भोजनार्थं स्थितस्तत्रत्यैर्ग्राममुख्यैः समं संलपंस्तैः सहैव साधारणं किमपि अन्नं भुंजानः स्वस्मिंस्तेषां प्रीतिमुत्पादयामास. तेऽपि दारिद्र्यपीडिततया स्वामिपुत्रसत्कारेऽसमर्थाः स्वयमागत्य तेन संलापिता आत्मानं कृतकृत्यानमन्यन्त. शिवराजश्चाजन्म समवेषधारी सर्वत्र प्रचचार. कदाचिदतिदुर्गमदुर्गनिरीक्षणार्थं सेवकसहाय एकाकी ययौ. तस्य चेतसि राजपुत्रत्वदुराभिमानः पदमपि न लेभे. अनया समवृत्या शिवराजस्य यशः सर्वत्र प्रससार. सर्वेऽपि महा-

राष्ट्रियाः स्वनिवासं चरणधूलिक्षेपेण पावयितुं तं प्रार्थयन्त. सोऽपि तदीयामभ्यर्थनां स्वीकृत्य तन्निवासं गत्वा तान् संतोषयामास. एवं निखिलं सह्याचलं तथा तत्संबंधिनं भूविभागं पर्यटित्वा शिवराज इदमेव सर्वथा स्वराज्यस्थापनार्थं योग्यं स्थानमिति निरणयत्. निर्णीय चेत्थं जनसंग्रहं, मंत्रिसंग्रहं, धनसंग्रहं च चिकीर्षुः क्रमेण प्रावर्तत. शिवराजः स्वराज्यस्थापनार्थं यदा सह्यप्रान्ते पर्याटत्तदा स तत्र बहून् देशमुखानपश्यत्. इमे च देशमुखाः केवलं नियतं कर-द्रव्यं विजापुराधिपाय ददतः सर्वत्र यथेच्छमवर्तन्त. ते च स्वशक्ति-मनुसृत्य सेनां स्थापयित्वा कमपि प्रदेशविशेषमाक्रम्य समानीतैर्द्रव्यै र्योगक्षेमं कुर्वन्तः सुखेनाजीवन्. एते च मानधनाः क्षुद्रेणाऽपि कारणेन परस्परमकलहायन्त. ततः प्रतिदिनं युद्धानि प्रावर्तन्त. शिवराजश्च तान् बलाढ्यान् स्वानुकूलान् विधातुं प्रयतमानस्तेषां वैराणि अशमयत्. भूयोभूयः स्वदेशस्य स्वधर्मस्य च दुरवस्थां तेभ्यो निवेद्य स्वराज्यस्थापनोद्यतमात्मानं साहाय्ययितुं विज्ञापयामास. तेऽपि च क्षत्रियकुलसंभूता महता सन्तोषेण स्ववैराणि त्यक्त्वा शिवराजं साहाय्ययितुं शपथं चक्रुः. सुप्रसिद्धप्रभुकुलसंभूतो नरेश्वर-पुत्रो दादोजिनामा देशमुखः प्रथमत एव शिवराजं साहाय्ययितुमु-द्यतो रोहिडेपर्वतवासिनो रोहिडेश्वरनाम्नः शंभोः पुरतः 'अहं चाजन्म त्वां स्वराज्यस्थापनार्थं साहाय्ययिष्यामि' इति शपथं चकार. विजापुराधिष्ठतेन तत्प्रान्ताधिपेन स्वयं विजापुराधीशेन च प्राणदण्डेन

तर्जितोऽपि न स स्ववचनं दूषयामास. एकदा तु केनापि सूचकेन निवेदितयवनाधिपकोपः स्वगृहं विहायारण्यमेवावसत्. एवं बहवो देशमुखाः स्वसदाचारेण शिवराजेन वशीकृतास्तत्पक्ष्या अभवन्. ते च सेनादानेन द्रव्यवितरणेन च समये समये स्वयं समागत्य शिवराजं साहाय्ययामासुः.

(२)

एवंरीत्या बलाढ्यान् देशमुखान् स्वानुकूलान्विधाय शिवराजः स्वयं चिन्तयामास. एते देशमुखाः स्वयं संपन्ना धनदानेन वा सैनिकदानेन वा साहाय्ययिष्यन्ति परन्तु ये खलु साक्षादेव युद्धे योत्स्यन्ते तेषामानुकूल्यं विनाऽशक्या स्वराज्यस्थापना. तस्मात्तेषामपि आनुकूल्यमत्यावश्यकमिति. विचार्य चैवं स दृढनिश्चयः शिवराजस्तस्मिन् प्रदेशे विख्यातानां क्षत्रियाणां वंशजैः समं गाढां मैत्रीं समपादयत्. तेषु च शिवराजस्य परं मित्राणि 'तानाजिमालुसरे एसाजिकंक, बाजीफसलकर, नामान्यासन्. एतान्येव त्रीणि मित्राणि पुरस्कृत्य परं शूराणां महाराष्ट्रियाणां मावळेजनानां महतीं सेनां विरचयामास. नैतावदेव किंत्वन्यानपि स्वानुकूलान्विधाय प्रसंगेऽसंख्यशूरजनलाभमपि भाविनं कल्पयामास.

वाचकाः! एवं श्रीशिवराजेन प्रोत्साहिता मावळेजना निर्धूतकार्पण्या न केवलं शिवराजसमय एव विलक्षणान् पराक्रमांश्चक्रुः, किंतु

यावत्कालं महाराष्ट्रे स्वराज्यमासीत्तावत्तदीया वंशजाः स्वपराक्रमैर्यवनान् कातरान् व्यधुः. यथा च भगवता दाशरथिना वानराणां सेनां निर्माय बलाढ्यो रावणो हतस्तथैव दूरदर्शिना गुणपक्षपातिना श्रीशिवराजेन मावळेजनानां चमूं विधाय दिल्लीश्वरप्रभृतीन् समस्तभारतवर्षस्वामिनो निर्जित्य महाराष्ट्रे स्वराज्यं स्थापितं. दिवंगते शिवराजे तस्य ज्येष्ठतनये संभाजिराजे व्यसननिमग्ने सर्वेषु च प्रधानामात्येषु प्रभोः क्रूरदण्डेन निर्विण्णेषु सत्सु कपटी दिल्लीश्वरोऽवरंगजेबनामा महाराष्ट्रस्वराज्यं नाशयितुमाद्वादशवर्षं प्रायतत परन्तु भूयोभूयो महाराष्ट्रियैः पराजितः पंचत्वमेव प्राप न स्वमनोरथासिद्धिं. वान्धवाः? अस्य प्रधानं कारणमिमे मावळेजना एव. ते च परमस्वामिभक्ताः स्वराज्यरक्षार्थं परं प्रयेतिरे.

(३)

एवं देशमुखानां तथा शूराणां मावळेजनानां साहाय्यं लब्ध्वा सन्तुष्टोऽपि स शिवराजः सर्वस्यास्य प्रारब्धितस्य कार्यस्य सिद्धये आवश्यको धनव्ययः कथं कर्त्तव्य इति विचारयामास. यद्यपि शिवराजः स्वपैतृकधनसंचयात् प्राथमिकं धनव्ययं कर्तुं समर्थ आसीत्तथापि सर्वं व्यवहारं दादोजीकोंडदेव एवापश्यत्. स एव सर्वं व्यवस्थाप्यावशिष्टं कोशं शहाजिराजानां संनिधौ प्रैषयत्. चतुरः शिवराजस्तं दादोजीकोंडदेवं स्वानुकूलं विधातुं प्रयतमानोऽचिरादेव पूर्णं यशो लेभे. दादोजिकोंडदेवस्तु प्रथमतोऽनेनोद्यमेन स्वस्वामिनः

सर्वस्वनाशमुत्प्रेक्षमाणो नानुकूलोऽभवत्, परन्तु यथा यथा स शिवराजस्य गुणांस्तथा प्रतापानपश्यत्तथा तथा तदीयभाग्योदयं प्रति वीतसंशय आनुकूल्येनावर्तत. स च स्वामिभक्तः सेवको यदा रोगपीडितो जर्जरितकलेवरो मृत्युशयायां पपात तदा स समीपस्थं शिवराजं महता प्रेमातिशयेन जगाद—शिवराज! सम्प्रति अमी यवना अस्मान् परं तापयन्ति. प्रतिपदं धर्मनाशं तथाऽबलानां प्राणसमं पातिव्रत्यं गत्वां च प्राणानपहरन्तः परं पीडयन्ति. एतेषां नाशाय प्रयतनीयमेव. तथापि बलाढ्या इमे. अस्मदीयाश्च जना अद्यापि ऐक्यभावमनापन्नास्तत्सेवायामेवात्मानं सुखिनं मन्यन्ते. तेनैते त्वादृशमेकाकिनं तन्नाशाय प्रयतमानं शीघ्रमेव नाशयेयुः. भगवती जगदम्बा त्वां यशस्विनं विधाय महाराष्ट्रभूमिं स्वातंत्र्यसौभाग्यालंकृतां विदधातु. सर्वदा सावधानेन वर्तस्व. सर्वथा गोब्राम्हणान् प्रतिपालय इति. शिवराजोऽपि पितृसमस्य तस्य स्वामिभक्तस्य सेवकस्य वचोऽभिनंद्य तथैवावर्तत. प्राथमिकं धनव्ययं ततएव कुर्वाणः शिवराजो दादोजिकोंडदेवेन समये समये प्रतिबोधितोऽचिरादेव निभृतं सन्नाहमकरोत्.

(४)

एवं स्वल्पं धनं व्ययीकृत्य निभृतं विहितसन्नाहोऽपि शिवराजः प्रतिदिनमधिकं धनमपेक्षमाणः स्वामित्रैः समं कर्तव्यं चिन्तयामास. यतः शहाजिराजानां वार्षिकी धनप्राप्तिर्द्वादशलक्षपरिमिताऽ-

सीत. ततएव कृत्स्नं व्ययं कृत्वाऽवशिष्टं लक्षद्वयं शिवराजेन प्रारब्धेऽलौकिके कर्मणि कथं पर्याप्तं भवेत्. एवं चिन्तामग्नं शिवराजं तथा तदीयं मित्रमंडलमवलोक्य कश्चन देशमुखोऽवदत्–राजन्? इदं हि न आर्याणां भारतोद्धाररूपमावश्यकं कर्म. तस्मिन् कर्मणि तेन भारतेन कररूपेण दत्तं द्रव्यं कुतो न गृह्यते? नात्र पापस्य लेशः. यतो ये खलु यवनाधिपाः प्रजाभ्यः संपादितं करद्रव्यं यथेच्छमुपयुंजानाः परकान्तासंसर्गतत्पराः कृत्स्नां नो मातृभूमिं पारतंत्र्ये पातयन्ति ते पापभाजो भवेयुरथवा सनातनधर्मस्य गोब्राह्मणानां तथाऽऽर्यमहिलानां रक्षार्थं प्रयतमानाः केवलमस्य कार्यस्य सिद्धये द्रव्यमपेक्षमाणा वयं पापभाजो भवेमेति विद्वांस एव विदांकुर्वन्तु इति.

शिवराजस्तथा तदीयं मित्रमण्डलं तस्येदं देशमुखस्य भाषणं निशम्य सन्तुष्टं तथाकर्तुमन्वमोदत. अचिरादेव तस्मिन् प्रदेशे ये केचन विजापुराधीशेन नियुक्ता अधिकारिण आसन् तेषां कोशांस्तथा तैः प्रेषितांश्च तान् स्वसैनिकैः समाक्रम्यानयत्. तेन च पर्याप्तो धनलाभोऽजायत. वाचकाः! इदं शिवराजस्य कर्म गर्ह्यमिति केचन मन्यन्ते परन्तु सदसद्विवेकचतुराश्चेदं न्याय्यमेव वदन्ति. वस्तुस्तु यदि भारवर्षाद्भारतवासिभ्य एव संपादितं द्रव्यं तेषामेव सुखार्थं प्रयुज्यते, तदा तत्रान्यायस्यावकाश एव न. नहीतः परोपकारात्मकं परं कार्यं विद्यते. अनाथानां रक्षणं यदि पुण्यं कर्म तदा तदर्थं संपादिता सामग्री कथं पापकारणं स्यात्? तस्माद्युक्तमेव समाचरितं शिवराजेन. अस्तु.

---

८ स्वराज्यस्थापनारंभः

१ दुर्गाक्रमणं

२ स्वकीयस्याऽपि विरोधिनः शासनं.

३ परकीयानामप्यनुकूलानां संग्रहः

४ व्यवस्थितसेनासन्नाहः

(१)

अथ शिवराजः स्वराज्यस्थापनासामग्रीं संमीलितां वीक्ष्य त्वरया कार्यं विधातुमियेष. विलंबेन कार्याणि नश्यन्तीति राजनीतिरपि. स च सत्वरमेव सर्वं मित्रमण्डलमाहूय जगाद- सुहृदः ? इदानीं स्वराज्यस्थापनारंभस्तु कर्तव्य एव. यथा यथाऽस्माकं प्रयत्नो यशस्वी भवेत्तथा तथाऽधिका सामग्र्यपि समागमिष्यति. तत्र प्रथमतः स्वरक्षार्थं सह्याचलवर्तीनि दुर्गाणि स्वायत्तानि विधेयानि. तेन समये बलाढ्यैर्यवनाधिपैः समं योद्धुं वयं समर्था भविष्यामः. अस्माकमिमं प्रयत्नं स्वराज्यनाशकरं मत्वा विजापुराधीशोऽवश्यमेवास्मन्नाशार्थं बलाढ्यान्सेनापतीन् प्रेषयिष्यति. ततः स्वरक्षां विधाय तेषां पराजा

यार्थमिमानि दुर्गाण्यवश्यमुपकरिष्यन्ति. वयं च तेषु तेषु दुर्गेषु स्थित्वा तान् सेनापतीन् पराजेष्यामहे. यद्यपि अधुना वयं युध्वा कतिपयदुर्गाणि स्वायत्तीकर्तुं समर्था स्मस्तथापि यथाशक्ति भेदेनैव कार्यं करणीयमिति राजनीतिर्वदति. यवनैरपि भेदं विधायैव प्रायः सर्वं भारतवर्षं समाक्रान्तं. तद्यदीदं भवतां संमतं तदा शीघ्रमेव क्रमश इमानि दुर्गाणि जेतुं प्रयतिष्यामह इति. शिवराजस्येदं युक्तिसमन्वितं भाषणं समाकर्ण्य संतुष्टास्ते सत्वरमेव तथाकर्तुं विज्ञापयामासुः. महतोत्साहेन श्रीशिवराजः किं दुर्गमाक्रमितुमाज्ञापयतीति प्रतिपालयामासुः.

अचिरादेव श्रीशिवराजः पुण्यपत्तनात्पश्चिमोत्तरेण दशसु क्रोशेषु वर्तमानं तोरणाभिधं पर्वतदुर्गं पूर्वोक्तमित्रत्रयस्य साहाय्येन तदधिपं वशीकृत्य स्वाधीनं व्यधात्. सत्वरमेव तद्दुर्गं परिष्कारादिभिः संस्कृत्य शत्रोराक्रमणसहं विदधे. यदा च शिवराज एतद्दुर्गं संस्कर्तुं चखान तदा महान्तं भूमिगतं द्रव्यराशिमलभत. प्रकृत्यैव श्रद्धालुः तं द्रव्यराशिं स्वराज्यस्थापनार्थमेव भगवत्या जगदम्बया प्रदत्तं मन्यमानो महतोत्साहेन कार्याणि समारभत. तस्य सुहृदस्तथा सैनिकाश्च 'शिवराजेऽस्ति भगवत्याः कृपा, इति मन्वानास्तां द्रव्यलाभवार्तां सर्वत्र प्रसारयामासुः तेन सर्वत एव जनास्तत्साहाय्यार्थमागच्छन्. शिवराजश्च तोरणादुर्गं गृहीत्वा शीघ्रमेव तस्मात् पूर्वदक्षिणेन 'राजगड'नामकं नूतनमेव दुर्गं व्यरचयत्. ततश्च पुण्यपत्तनगामिनि मार्गे वर्तमानं चाकणदुर्गं स्वकार्योपयोगीति मत्वा तदधिपं

'फिरंगोजिनरसाळा'भिधं महाराष्ट्रियं स्वानुकूलं विधाय स्वायत्तीचक्रे. तथैव सिंहगडदुर्गाधिपं यवनं द्रव्येण वशीकृत्य तदपि बलाढ्यं दुर्गं हस्तगतमकरोत्.

वाचकाः? इत्थमनेकानि बलाढ्यानि दुर्गाणि केवलं भेदमवलंब्यैव श्रीशिवराजः स्वाधीनान्यकरोत्. अत्र च तदीयं राजनीतिचातुर्यं स्पष्टमालक्ष्यते. अस्मिन् समये शिवराजः केवलं विंशतिवर्ष एवासीत्. एतावत्यल्पे वयसि एतादृशलोकोत्तरकार्यविधानं न दैवीं कृपां विनेति तु सत्यं. अस्तु.

इत्थं बहूनि दुर्गाणि गृहीत्वा प्राप्तबलो भेदेनासाध्यानि दुर्गाणि तथा भूविभागांश्च बलेन जेतुमियेष. स च प्रथमतः पुण्यपत्तनस्य समीपस्थं कल्याणप्रान्तं स्वायत्तीकर्तुं मतिं चक्रे. यतस्तत्र दुर्भेद्यानि बहूनि दुर्गाणि आसन्. स च भूविभागो निजामशाहीराज्यनाशे कृतं साहाय्यं स्मरता दिल्लीश्वरेण विजापुराधीशाय प्रदत्तः. विजापुराधीशोऽपि तं परमबलाढ्यदुर्गरक्षितमत्युपयोगिनं मन्वानस्तस्य पालने परमस्वामिभक्तं शूरं 'अहंमद'नामानं यवनमेव नियोजयामास. तं च यवनं स्वामिभक्त्या विख्यातं भेदेन वा द्रव्येण वा वशीकर्तुमसमर्थः शिवराजोऽकस्माच्चारमुखेन तं कोशेन समं राजधानीं गच्छन्तं श्रुत्वा जवेन निर्गतो मार्गे एव तदीयं सैन्यमाक्रम्य सर्वं तं कोशं स्वनिवासं राजगडदुर्गमानयत्. कोशरक्षका यवनसैनिकास्तथा तदधिपश्च सोऽहंम-

दोऽकस्मादागतमिदं पराक्रमणं विलोक्य विस्मिता न प्रतिकर्तुं प्राभवन्. शिवराजश्चाविलंबेन सर्वं तं भूविभागं स्वायत्तं विधाय तत्रस्थानि सर्वाणि दुर्गाणि स्वकीयान्यकरोत्.

अथाचिरादेव श्रुतकीर्तयः कोंकणवासिनो जनाः शिवराजं 'कोंकणप्रान्तः समाक्रमणीयः, वयं च सर्वथा युष्मान् साहाय्ययिष्यामः' इति विज्ञापयामासुः. तदानीं ते च जंजिरानाम्नि सुप्रसिद्धे दुर्गे निवसता फत्तेखानशिद्धीनाम्ना यवनेन परं पीडिता आसन्. स च क्रूरकर्मा यवनः प्रतिदिनं ग्रामानाक्रम्य गृहाणि दग्ध्वा धनादिकमपहृत्य सपत्नीकान् पुरुषान् दासीकृत्यापणे व्यक्रीणात्. केषांचिद्देहेषु तप्तं तैलं निक्षिप्य तानदहत्. कांश्चित् पाषाणं गले बध्वा समुद्रे न्यमज्जयत्. प्रदीप्ततैलकटाहे कानपि न्याक्षिपत्. ईदृशैः क्रूरैः कर्माभिस्त्रस्तास्ते शिवराजं महतादरेण स्वरक्षणार्थं प्रार्थयामासुः. शिवराजोऽपि दीनरक्षणप्रधानकर्मा तेषामिमां विज्ञप्तिमाकर्ण्य कोंकणविभागमाक्राम्यत्. स्वायतीचक्रे चानेकानि दुर्गाणि सुसंपन्नैर्भूविभागैः समं. कृतकृत्यो महत्या श्रद्धया हरिहरेश्वरक्षेत्रं गत्वा भगवन्तं पार्वतीनाथं प्रणम्य भगवत्प्रसादमिव गोंवळकरसावंतनाम्ना केनापि पराक्रमशालिना पुरुषेणोपायनीकृतं सुप्रसिद्धं भवानीखड्गं लेभे. तं च खड्गं लब्ध्वा शिवराजः प्रतिदिनमाधिकमेव यशस्वी बभूव. भगवतीपूजासमये तं खड्गं पूजयंस्तं भवानीनाम्नैव व्यपादिशत्. इत्थं कोंकणविभागं स्ववशं विधायापारद्रव्यसंपन्नः स्वराजधानीमाययौ.

(२)

दिवंगते दादोजीकोंडदेवे श्रीशहाजिराजसंपादितस्य भूविभागस्य व्यवस्थां स्वयं शिवराज एवापश्यत्. एकदा शहाजीराजानां सेवकान् द्रव्ययाचनार्थमागतान् 'अस्य भूविभागस्य करद्रव्यं व्यवस्थापनार्थमेव न पर्याप्तं. कथमपि वयमिमं विभागं पालयाम' इति कथयित्वा प्रतिप्रेषयामास. शहाजीराजाअपि श्रुतपुत्रकीर्तयः सन्तुष्टाः शिवराजकर्मणा क्रुद्धात् स्वाधिपात्किमपि अनिष्टमाशंकमानाः कर्णाटकविभागमगच्छन्. परन्तु शिवराजस्येदं कर्मानिष्टं मन्यमानाः केचन श्रीशहाजिराजसुहृदस्तत्रासंस्तेभ्य इदं नारोचत. तेषां च मुख्यः 'संभाजिमोहिते' नामा कश्चन श्रीशहाजिराजानां श्यालः शिवराजस्य सापत्नमातुर्भ्राता सुपेनाम्नि भूविभागेऽवसत्. स हि वार्षिकं करद्रव्यमदत्वा स्वतंत्रवदवर्तत. आश्विकानां शतत्रयेन गर्वितः शिवराजं नागणयत्. तदीयमिदं वर्तनमवलोक्य क्रुद्धः शिवराजो मावळेजनसेनां गृहीत्वा एकस्मिन् मध्यरात्रे तमाक्रम्य पराजित्य सर्वं कोशं जग्राह. पराजित्याऽपि स्वमातुलं महतादरेण स्वसमीपे स्थातुं विज्ञप्यानंगीकुर्वन्तं तं प्रेमातिशयेन व्यसर्जयत्. इत्थं स्वमातुले निःपक्षपातं वर्तमानं शिवराजं सर्वे जना अस्तुवन्. ये च तटस्थास्तेऽपि ताटस्थ्यं विहाय शिवराजपक्ष्या भवितुमैच्छन्. ये च शत्रवस्ते मातुलशासनभीताः क्रमेण वैरमत्यजन्. युक्तं चैतत्! कथमन्यथा श्रीशिवराजस्य यशःशाश्वतामिह लोकेऽभविष्यत्. लोके हि साधारणा जनाः पुत्र-

मित्रमोहव्याकुलास्तथैव कर्माणि कुर्वन्ति. ये तु अलौकिकाः पुरुषास्ते विधूय पुत्रामित्रादीनां स्नेहं न्याय्यमेव समाचरन्ति. अस्मिञ्जननमरणक्रमवति संसारे को वा न मृतो न च जातस्तथापि तस्य यशो भवति यो न्याय्यं समाचरति. क्व सन्ति साम्प्रतं शिवराजसदृशा नरपुंगवास्तथापि तेषां यशस्तु सर्वत्र शोभूयत एव.

(३)

अथ सर्वतः प्रसृतां शारदज्योत्स्नासहचरीं श्रीशिवराजस्य कीर्तिं निशम्य विजापुराधीशेन स्वसेवातो निर्वासिताः सप्तशता यवनास्तं सेवितुमागच्छन्. अकस्मादागतांस्तान् यवनानवलोक्य विस्मितः शिवराजस्तान् स्वसेवायां स्थापयितुमनुत्सुक एवासीत्. युक्तमपीदं. यतो दिल्लीश्वरप्रभृतयो यवनाधिपाः कृत्स्नं भारतवर्षं समाक्रम्य स्थिता आर्याणामपेक्षया यवनानेव सुखेनापालयन्. महत्सु पदेषु तानेवोपायुंजन्. यवनांश्च महताऽऽदरेणावर्तयन्. तेन सर्वानपि स्वकीयान् बलाढ्यान्नृपान्विहाय मामेव किमर्थमिमे सेवितुमागता इति शिवराज आशंकत. प्रायः सर्वत्रैव यवनाः कौटिल्येन शत्रून् व्यराजयन्त. प्राथमिकाः क्षत्रियराजा धर्मेणैव युध्यमाना एभिर्यवनराजैर्लीलयैव पराजिताः. इदं च यवनानां कौटिल्यं जानन्स न कदापि तेषु व्यश्वसीत्. एतच्च स्वामिनोऽननुरूपं वर्तनमवलोक्य 'गोमाजीनाईकपानसंबळ' नामकं परमं मित्रं शिवराजं जगाद—स्वामिन्?

ये खलु त्वदीयं यशः श्रुत्वोदरभरणार्थं सेवेच्छया समागतास्तेषां निराकारणं न सम्यक्. वर्धिष्णुना राज्ञा सर्वजातीयाः प्रजाः स्वस्व-धर्माचरणानुरोधेनानुगृह्य पालनीयाः. यद्यार्या एव संग्राह्या इति मनीषा तदा कथं समग्रं भारतसाम्राज्यं सिध्येत्? किंच यदीमे यवन इति समुपेक्ष्यास्तदाऽत्यन्तमनुचितं. यथा हि यवनजातौ नीचा सन्ति. तथैवोदाराः कृतज्ञा अपि. यथा च सर्वेष्वपि मानवेषु कृतघ्ना कृतज्ञाश्च जनाः समुपलभ्यन्ते तथा महंमदीयेष्वपि. किं न सन्ति सहस्रशः कृतघ्नाः क्षत्रियाः? किं न 'रणदुल्लाखान'नामा यवन एव तत्रभवतां शहाजिराजानां परमः सुहृत्. तस्मादवश्यमिमे संग्राह्या. यो हि वर्धिष्णुस्तेन सावधानेन भाव्यं. अस्मासु च सावधानेषु न किंचिदत्याहितं भविष्यतीति.

इदं चोपयुक्तं वचनं निशम्य शिवराजस्तान् सर्वान् स्वसेवायां न्यधात्. तेऽपि कृतज्ञाः कार्याणि कुर्वन्तः ससुखमवसन्.

(४)

यथा यथा शिवराजः शत्रून्विजित्य दुर्गाणि भूविभागान् कोशांश्च स्वायत्तानकरोत्तथा तथा नानादेशेभ्यो गुणिजना वसन्ते प्रफुल्लं सहकारमिव भृंगाः सेवितुमाययुः. शिवराजोऽपि तान् सर्वानेव सत्कृत्य स्वसंनिधौ स्थापयामास. स च स्वराज्ये राजनीतिप्रवीणान् न्यायाधीशान् स्थापयित्वा प्रजाः पुत्रवदशात्. तेन सकलाअपि प्रजा-


जनाः सुखेन वर्तमानाः स्वकीयान् दुर्मदयवनपीडितान् स्वनिवासं त्यक्त्वा शिवराजराज्यं समागत्य वस्तुमकथयन्. तेऽपि विहाय यवनराज्यानि रामराज्यमिव सर्वथा सुखकरं शिवराजराज्यमागत्याव-सन्. शिवराजश्च शुक्लपक्षेन्दोरिव वर्धमानस्य राज्यस्य पालनार्थं सेनासन्नाहं चिकीर्षुः प्रथमतः सर्वकार्यदक्षमेव मंत्रिणमन्वैषयत्. अचिरादेव सर्वराज्यकार्यधुरंधरं बालाजिनामजीचिटणीसनाम्ना महा-राष्ट्रेतिहासे विख्यातं नरवरं लेभे. तच्च वृत्तमित्थं. शिवराजो यदा कोंकणविभागमगच्छत्तदा तत्रत्यं राजापुरनगरमाक्रमितुं सैन्यं ययौ. तदानीं वन्दीकृताञ्जलिस्तुरुष्कान् बालश्चन्द्र नामः सत्वरमागत्य श्री-शिवराजचरणावर्णयत्. तत्र जातं [illegible] स्वप्रभुमित्थमक-थयत्—नृपश्रेष्ठ ? मम पितरं जाफरखानाभिधो यवनोऽचिरं तत्रैवा-वसत्. एकदा च स्वामी विना दुर्दिनः स यवनाधिपो भ्रातृसहितं पितरं जघान. अस्मांश्च बन्दीकृत्य पूर्वदिक्ष्य अस्मत्तनाम्नि यवनप्रदेशे विक्रेतुं सागरमार्गेण [illegible] वयं च पितृवियोगदुःखा-कुला मात्रा समं तद्देशगामिनि पोते समारुह्य स्वस्वामिनं प्रार्थयाम. ततश्च मम माता धैर्यमवलंब्य [illegible] यवनेशमवलोक्यास्मिन् राजापुरग्राम एवामोचयत्. इदानीं यो यवनाधिपराजधानीं न गन्तुं दत्तवचना इहैव कथंचिद् [illegible] सकलभूपाल-शिरोमणे? यद्यस्ति कृपालेशस्त्वयि तत्तेऽर्पणीयं जनः. अहं च वंशपरं-परीयं कुलं स्वामित्वेन समानः स्वराज्यवृध्यर्थं यतिष्ये

इति. इदं च तस्य दीनं वचनमाकर्ण्य सन्तुष्टस्तदीयान् सर्वानपि भ्रातॄंस्तथा मातरं तेनापि समं स्वसेवायामस्थापयत्. अयमेव तरुणः सकलमहाराष्ट्रसाम्राज्यस्य प्रधानमंत्री बभूव. वाचकाः? केवलं मयाऽयं प्रधानराजपुरुषान्तर्गततया निर्दिष्टः. वस्तुतस्तु घोरपडे,शिर्के,सरनोबत, घाटगे, निंबाळकर, गुजर, पालकर, जगतापीत्यादिभ्यः सुप्रसिद्धेभ्यः क्षत्रियकुलेभ्योऽसंख्याः शूराः समागत्य शिवराजसेनायामुच्चानि पदान्यलंचक्रुः.

एवंरीत्या तांस्तान् राजकार्यचतुरान् पुरुषान् प्राप्य सन्तुष्टः शिवराजः स्वसेनां व्यवस्थितां कर्तुमियेष. आद्यावधि तु ये केचन महाराष्ट्रियास्तरुणाः स्वयमागतास्तांस्तथा शहाजीराजसंपादितस्य भूविभागस्य रक्षणार्थं येऽश्विका आसंस्तांश्च गृहीत्वा महता साहसेनोपरिलिखितानि शिवराजः कार्याणि चक्रे. इदानीं तु आक्रान्तप्रभूतदुर्गः सम्प्राप्तधनो लब्धभूपालनार्थं, तथा पुनर्नूतनभूसंपादनार्थं सेनावृद्धिमपेक्षमाणस्तामेव चक्रे. यद्यपि शास्त्रे सेनायाश्चत्वारि अंगानि कथितानि, तथापि पर्वतमये महाराष्ट्रे गजानां तथा रथानामनुपयोगं पश्यन् चतुरः शिवराजस्तीक्ष्णाग्रभल्लमाण्डितानामाश्विकानां तथा खड्गधारिणां पदातीनामेव सैन्यं विरचयामास. सर्वस्मिन् भारतवर्षेतिहासे महाराष्ट्रियाणां भल्लक्षेपः सुप्रसिद्धोऽस्ति. तथैव धानुष्काणां शरसंधानं. धानुष्काश्च निभृतं वृक्षशाखासु

ीनास्तथा शरवृष्टिमकार्षुर्यथाऽज्ञातशरागमनस्थानाः शत्रवः कांदि-
ीका अभूवन्.

तत्र शिवराज एषां प्रत्येकं विभागं विधाय तत्र स्वामिभक्तं
शलमेकमधिकारिणं न्ययोजयत्. नेताजीपालकरनामानमतिशूरं महा-
ाष्ट्रियं वाजिदलस्य मुख्यमधिकारिणं चक्रे. तथैव येसाजीकंकनामकं
ालमित्रं शूरं मावळेमुख्यं पदातीनां मुख्यमधिकारिणं. गजशालायास्त-
ोष्ट्रशालायाः शतघ्नीविभागस्य चाधिकारिपदे शामराजरांझेकरनामानं
ातुरं पुरुषं न्ययुंक्त. सज्जनाः? एवमल्पीयसा कालेन श्रीशिवराजः
वतंत्रराज इव सर्वैरधिकारिभिः स्वराज्यमपालयत् प्रतिदिनमवर्धयच्च.



१ विजापुराधीशस्य कार्पट्यम्.

२ शिवराजस्य मातृभूमिप्रीतिः

३ शहाजीराजानंकारागारवासः.

४ शिवराजस्य राजनीतिचातुर्यं.

५ कार्यासिद्धिः.

(१)

एवं सर्वदा विजयमानं नानादुर्गसमाक्रमणेन बलाढ्यं शिवराजं समाकर्ण्य विजापुराधीशश्चिन्तातुरो मंत्रिभिः समं किं कर्तव्यमिति विचारयामास. मावळेप्रान्तानियुक्ताः प्राय सर्व एवाधिकारिणः शिवराजतो भीताः स्वरक्षणार्थं तं प्रार्थयन्त. यदा तु कल्याणप्रान्ताधिपोऽहंमदः स्वयमागत्य कोशाक्रमणं तथा कृत्स्नस्य कल्याणप्रान्तस्य स्वायत्तीकरणमश्रावयत्तदा स शिवराजमनुपेक्षार्हं मेने. स च कपटी

थमतः शिवराजसमारब्धे कार्ये शहाजिराजानां साहाय्यमाशंकमान-
तानेव स्वपुत्रस्य शासनार्थमाज्ञापयामास. शहाजीराजाश्च प्रकृत्यैव
रलाः स्वयं विजापुराधीशाद्भयमाशंकमाना महता विनयेन तं विज्ञा-
यामासुः. स्वामिन्! नास्ति मम कोऽपि संबंधः शिवराजेन. शिवरा-
जश्च यद्यपि मां पितरं मन्यते तथापि ममाज्ञां न शृणोति. तत्
स्वामिभिरेव यथेच्छं शासनीयः. तत्र न मे कोऽपि क्षतिः. अथवाऽह-
मेव तच्छासने नियोजनीयः. अहं च सर्वथा तं शासिष्यामीति. निसर्गत
एव कपटमतिः स यवनराज इदं श्रीशहाजीराजानां स्वामिभक्तिमयं
भाषणं कल्पितं मिथ्या मन्यमानः सततं यवनराज्यसेवया
लब्धवार्धक्येपु परमस्वामिभक्तपु श्रीशहाजीराजेपु कपटमाचरितुं मतिं
चक्रे. वाचकाः? स्वभावो दुष्परिहरः. ये खलास्तेषां बोधेन वा
दण्डेन वा न कोऽ पि लाभः. निंवश्च सर्वथा प्रेम्णा सेवितोऽथवा
परशुना छिन्नः सर्वस्य कटुरेव सः. तस्मात् खलानां सेवा विपवद्धेया.
अस्तु. एवं विचिन्त्य स भूयो विचारयामास. कथं खलु शहाजीराजाः
प्रतिबन्धे स्थापनीयाः? यदि तान् बन्दीकर्तुं कश्चन सेनापतिः प्रेषणी-
यस्तदा तेऽपि शूरा बलाढ्या अवश्यमेव योत्स्यन्ते. प्रारब्धे च युद्धे
बहवो हि तत्पक्षपातिनः सामन्ताः स्वस्वसैन्यानि समादाय तान् साहा-
य्यायिष्यान्ते. तदा च महती हानिः. अथ शिवराजस्य शासने कश्चन
सेनापतिः प्रेष्यते चेत्तदा स यदाऽस्मत्सेनापतिं विजयेत तदा महद-
निष्टं. तदानीमेव शहाजीराजाः पुत्रप्रेम्णा समाकृष्टा यदि शिवराजं

साहाय्यायितुं व्रजिष्यन्ति तदा तु सुतरां राज्यस्य हानिरेव. तस्मात् कपटेन शहाजीराजाः समाहूय प्रतिबन्धे स्थापनीयाः. पितरं च प्रनिबन्धस्थं प्राणसंकटपतितं समवलोक्यावश्यमेव शिवराजः क्षमां याचितुमागमिष्यति. सर्वथाऽस्मिन्नर्थे कपटाचरणं विना न गत्यन्तरमिति. चिन्तयित्वा चैवं स कपटी विजापुराधीशः कर्णाटकाविभाग-एव स्थितं बाजीघोरपडेनामकं स्वसामन्तं कपटेन श्रीशहाजीराजान् बन्दीकृत्य विजापुरनगरं प्रेपयितुं दूतद्वाराऽऽज्ञापयामास. सोऽपि राजशासनं शिरसा स्वीकृत्य शहाजीराजान् भोजनमिषेण समाहूय बन्दीचकार.

इत्थं स्वामिनियोगाद्बाजीघोरपडेसामन्तः सावधानेन श्रीशहाजीराजान् बन्दीकृत्य विजापुरनगरं प्रेषयामास. विजापुराधीशः स्वमनोरथं सफलमवेक्ष्य प्रमुदितस्तान् परं खिन्नान् शहाजीराजानवदत्. 'यदि त्वत्पुत्रः शीघ्रमेव क्षमां याचितुं नागमिष्यति तदा त्वं प्राणैर्वियोक्ष्यसे' इति.

परमसज्जनाः शहाजीराजास्तु स्वस्वामिन इदं निष्ठुरं वचो निशम्य क्रुद्धा अपि स्वामिमर्यादाभंगभिया स्वापमानं चोत्प्रेक्षमाणाः शान्तिमवलंब्य प्रत्यवोचन्. स्वामिन्! यदा मया निजामशाहीराज्यं दिल्लीश्वराद्रक्षितुं प्रायति तदैव यदि स्वतंत्रराज्यस्थापनेच्छा मेऽभविष्यत्तदा न तदशक्यमभविष्यत्. किंतु अस्मत्सजातीयेष्वेव कलहं पश्यता

मया स्वराज्यस्थापनाऽशक्येति निश्चितं. सोऽहं सर्वस्मिन्नपि निजामशाहीराज्ये दिल्लीश्वरेणाक्रान्ते युवा सन्नपि युष्मान् सेवितुमागतो नतु स्वातंत्र्यराज्यस्थापनायां निमग्नोऽभवम्. राजन्? इदमेव मदीयं वृत्तं पुत्रकृत्यानुकूल्याभावं द्योतयति. योऽहं शरीरसामर्थ्यशाल्यपि न स्वामिद्रोहमकार्षं सोऽहमधुना विगतोत्साहसंपत् कथं स्वामिद्रोहेणात्मानं दूषयिष्यामीति विचारशीलेन स्वामिनैव विचारणीयम् इति. एवं विज्ञप्यापि यवनराजस्य सन्तोषमपश्यन्तस्ते तत्समक्षमेवेदं पत्रं शिवराजायालिखन्.

चिरंजीव? शिवराज? तव कुकर्मभिः संतप्तो नः स्वामी अस्मान् कर्णाटकविभागादाहूय दूषयामास. आदिशच्च यदि ते पुत्रः सर्वाणि दुर्गाणि तथा भूविभागान् मह्यं समर्प्य क्षमां याचितुं शीघ्रमेव नागमिष्यति तदा महदनिष्टं भवेदिति. तस्माद्यदि मम प्राणाः प्रिया यदि वा कुलयशस्तदा त्वमवश्यं स्वामिचरणानां समीपमागत्य क्षमां याचिष्यसि इति.

(२)

शिवराजश्चेदृशं स्वहस्तालिखितं तातापादानां पत्रं वीक्ष्यात्यन्तं चिन्तातुरोऽभवत्. वाचकाः? अस्मिन् समये शिवराजस्य मानसं कामवस्थामलभतेति यूयमेव विचारयत? न खल्वतिकुशलस्याऽपि लेखकस्य लेखनी किंवा लघुहस्तस्य चित्रकारस्य चपलाऽपि तूलिका

लिखितुं दर्शयितुं च समर्थेति अहं मन्ये. इतः परमपवित्राः प्रातः-संस्मरणीयाः पूज्यास्तातपादाः, इतश्च रात्रिंदिवं प्रयत्नैः संपादितस्य शुभोदर्कस्य गोब्राह्मणरक्षार्थं स्थापितस्य स्वराज्यस्य बाल्य एव नाशः. इतो नैसर्गिकी पितृभक्तिः, इतोऽनिवार्या स्वदेशप्रीतिः, इतश्च पितृद्रोहपातकं, इतश्च मातृभूमिद्रोहपातकं. इतश्च पित्राज्ञापरिपालनपुण्यं, इतश्च सकलभारतमहिलापातिव्रत्यरक्षणपुण्यं. इतश्च निरतिशयस्वातंत्र्यलालसा, इतश्च तातानिष्टाशंका. इतश्च कुलदोषपातः, इतश्च कर्तव्यवैगुण्यदोषः. एवं दोलायमानचेताः कमपि एकं पक्षमवलंबितुमशक्नुवानः शिवराजः स्वमंत्रिमण्डलेन समं विचारयामास. परन्तु तेऽपि कर्तव्यविमूढा न किमपि निश्चित्य वक्तुं पारयांबभूवुः.

अथ किंकर्तव्यतामूढो दुःखव्याकुलः शिवराजः शयनागारं गत्वा शयनीये निपत्य विचारयामास. भगवन्? जानकीजाने? किं मां भूयोभूय ईदृशैर्दुःखराशिभिः संयोजयन् परीक्षसे? नाथ? यद्यपि तातचरणाः परं प्रियास्तथापि मातृभूमिः सर्वतो वंद्या. मातृभूमिं यवनाक्रान्तां भारतीयांश्च पशुवत् परकीयसेवामग्नान् महिलानां पातिव्रत्यस्य तथा गवां प्राणानां, विप्राणां धर्मस्य च नाशं पश्यन्नहं यथा दुःखी भवामि न तथाऽन्येन केनापि. अग्रिमा अस्मत्कुलसंभवाः शिवराजेन मातृभूम्युद्धारार्थं स्वतातचरणाः समुपेक्षिता इति वदेयुः.

न मे मातृभूसेवातो यशो वात्मा वा प्रियः. सत्यमिदं ! तथापि भगवन्! यदि तातपादान् सुखेन मोचयिष्यासि तदा वरं. अहं चात्मव्ययेन तातपादान् मोचयितुमिच्छामीति.

एवं चिन्तापरे शोकमग्ने शिवराजे राज्ञी सखीदेवी मूर्ता विजयश्रीरिव शयनागारमाययौ. सा च म्लानं शिवराजस्य मुखारविन्दं बाष्पपूरिते लोचने च समवलोक्य चिन्तातुरा समीपं स्थित्वा लीलया चिन्ताकारणमपृच्छत्. सोऽपि सर्वं वृत्तं तस्यै न्यवेदयत्. तन्निशम्य खिन्ना देवी धैर्यमवलंब्य जगाद. नाथ ? यद्यपि वयमबलाः, अस्माभिश्च राजनीतौ किमपि न वक्तव्यं, तथापि अहमत्र विषये किंचिद्वक्तुमिच्छामि. यदि योग्यं तदा ग्राह्यम्. यद्यपि श्वशुरचरणा महत्यामापदि मग्नाः. कदाचित् कुपितो विजापुराधीशस्तान् प्राणैरपि वियोजयिष्यति. तथाप्यस्माद्भयाद्युष्माभिः स्वराज्यस्थापनोद्यमान्न विरमणीयम्. प्रतिवर्षं वा प्रतिदिनं वा समग्रे भारते वर्षे जायमानानां गोहत्यानां पतिव्रताशीलहरणानां विप्रधर्मनाशानामपेक्षयाऽस्माकं वा श्वशुरचरणानां वा प्राणाः क्षुद्रा एव. परिवर्तिनि संसारे प्राणिनो जीवनं क्षणभंगुरमेव. तद्यदि पूज्यश्वशुरचरणानां प्राणव्ययेन सर्वेषां भारतीयानां प्राणा रक्ष्यन्ते तदा गच्छन्तु ते प्राणाः, लभन्तां च दुर्लभं चिरन्तनं यशो मदीयश्वशुरपादाः.

किंच–यदि यूयमेव स्वयं विजापुराधीशं शरणीकृत्य स्वराज्यस्थापनोद्योगं परित्यज्य जितानि दुर्गाणि तथा भूविभागान् मोक्ष्यथ

तदाऽपि स श्वशुरचरणान् मोक्ष्यतीति कथं श्रद्धेयं. प्रत्युताभयस्य तथा श्वशुरप्राणानां च याचनार्थं स्वयमागतान् युष्मानपि प्रतिबंधे स्थापयेत्. अथवा किमप्यनिष्टं कुर्यात्. इयं हि सर्पसमा यवनजातिर्न कदाऽपि विप्रलब्धा विश्वसनीया. किंवा बलिष्ठयोरनायासेन हस्तमागतयोर्युवयोरुभयोरपि अनिष्टं कुर्यात्. तस्मात् क्षमायाचनार्थं भवद्भिर्न गन्तव्यमेव. स्वराज्योद्योगाश्च न विरमणीयं. श्वशुरचरणानां प्राणास्तु युक्त्या रक्षणीया एव. अतःपरं दैवायत्तमिति. शिवराजश्च स्वमनोरथानुरूपं स्वपत्न्या भाषणं निशम्य शान्तचित्तः सुखेन सुप्तः प्रभाते मातरमभिवंद्य सर्वं वृत्तं निवेद्य कर्तव्यं पप्रच्छ. साऽपि वीरपत्नी वीरमाता तथैव जगाद. मातरमपि स्वानुकूलाभिप्रायामवलोक्य निश्चितकर्तव्यः शिवराजो मध्यान्हे तस्य पत्रस्य प्रत्युत्तरमित्थं लिलेख.

पूज्याः ? पितृचरणाः ? युष्माभिः प्रेषितं पत्रमवलोक्य नितान्तं खिन्नोऽस्मि. तत्रापि यैः स्वीयं जन्म स्वसेवायामेव व्ययीकृतं तेषां युष्माकं विषये विजापुराधीशस्येदृशीं वृत्तिमवेक्ष्य तु सुतरां. स्वकीयं लोकोत्तरं शौर्यं चातुर्यं च व्ययीकृत्य सेविता इमे यवनाः समय ईदृशं पारितोषिकं वितरन्तीति वीक्ष्याभिमा महाराष्ट्रियास्तरुणा यवनाधिपसेवातो निवर्तेरन्. स्वराज्यस्थापनायां च मां साहाय्ययेयुः. यथा हि पूज्यानां पितचरणानां युष्माकमाज्ञा प्रमाणं, तथैव गोब्राह्मणा-

नां च तथा मातृभूमेश्च. एवंविधाः प्रसंगाः प्रतिदिनं यवनराज्ये प्रजानामुपरि समापतन्ति. एतेषामेव निराकरणायाहं प्रयते. तत्र च मदीया वा पितृचरणानां वा प्राणा गमिष्यन्ति चेद्गच्छन्तु. यद्यपि ममापराधस्य कृते यूयं दण्डनीया इति विचित्रोऽयं न्यायस्तथापि यवनानां राज्ये न्यायस्यैवाभावादिदमेव युक्तं. तस्मान्मातृभूमेर्गो-ब्राह्मणादीनां च तथा भाविन आर्यसंतानस्य च शुभाकांक्षी अहं स्वराज्यस्थापनोद्यमान्न विरमामि. इदं पत्रं स्वस्वामिने प्रदर्श्यात्मा रक्षणीयः अन्यथा सर्वमेव भाग्यायत्तम्, इति.

वाचकाः ? किमेतत् पत्रमेव श्रीशिवराजस्यानुपमां मातृभूमि-प्रीतिं न दर्शयति ? क्व च सर्वथा पूज्यानां पितृपादानां जीवनाशंका? तामपि स्वीकृत्य स्वमातृभूमेः स्वातंत्र्यार्थं योऽविरतं प्रायतत तस्य शिवराजस्य स्वमातृभूमिप्रीतिः कथं वर्णनीया. बान्धवाः ? तत एवाद्यापि श्रीशिवराजस्य पवित्रं नामधेयं श्रुत्वा प्रमोदते मनः. आदरादृतं च चेतो भवति. अस्तु.

(३)

श्रीशहाजीराजाश्चेदं पत्रं स्वस्वामिने विजापुराधीशाय प्राद-र्शयन्. अवदंश्च–स्वामिन्? यथा पुरा मयोक्तं तथैव सर्वं वृत्तं नवेति स्वामी स्वयं विचारयत्विति. स च प्रकृत्यैव कपटी यवनः

सर्वमेवेदं कृत्रिमं मन्यमानः सकोपं प्रत्युवाच–राजन्? सर्वमेवेदं युष्माकं वर्तनं कृत्रिमं. निःसंशयं शिवराजस्य निभृतं साहाय्यकारिणो यूयमेव. कथमन्यथा स्वामिकोपपात्रीभूतान् शिवराज उपेक्षेत. तस्मादद्य कारागारे युष्मान्निक्षिपामि. परन्तु यदि शीघ्रमेव त्वत्पुत्रः समागत्य क्षमां न याचिष्यति तदा निर्वातं तत्कारागारं विधाय त्वां यमागारातिथिं करिष्यामीति. उक्त्वा चेत्थं स दुरात्मा यवनाधिपः स्वसेवकांस्तान् शहाजिराजान् कारागारं नेतुमाज्ञापयामास. ते तु स्वभाग्यानि निन्दन्तो यवनसेवाप्रायश्चितमेवेदं शासनं मन्यमाना महता धैर्येण तैः सेवकैः समं कारागारं प्रति जग्मुः.

वाचकाः? नीचभूपालसेवाया इदं फलमिति सर्वैरवगन्तव्यम्. यथा हि बुभुक्षितो मांसिको मञ्जुलशद्वकारिणीं मनोहररूपां सारिकां लीलया निहत्य तन्मांसं भुंक्ते तथैव नीचाः सर्वथा परमस्वामि-भक्त्या सेविताअपि काले प्रतीपा एव जायन्ते. सर्पश्च महता प्रेम्णा सेवितः. प्रतिदिनं पायितदुग्धोऽपि समये दशनेन प्राणानेव हरति. सैव रीतिर्नीचानां. तस्मात् कः सेवनीय इति विचार्य सेवकैः कश्चन सेवनीयः. वस्तुतस्तु अयं सेवकानामेव दोषः! ते हि यथा जात्यन्धा यत्रकुत्रचिद्गच्छन्तो गर्ते पतन्ति तथैव यं कमपि सेवमाना दुःखा-तिरेकं प्राप्य शोचन्ति. नीचानां तु नायं दोषः. यतस्ते नीचा एव. यथा ह्यग्नेर्दहनं स्वभावस्तथा नीचानामपि परापकार एव. अतोऽग्नेर्यथा निवर्तनमेव वरं तथा नीचेभ्यो निवृत्तिरेव श्रेयस्करी न संगतिः.

अस्तु. सर्वदुःखागारे कारागारे निवसन्तः श्रीशहाजिराजा अचिन्तयन्— अहो मे दौर्भाग्यम् ? मया हि निजामशाहीयवनराज्यस्य रक्षणार्थं यावन्तः परिश्रमाः कृतास्तावतः परिश्रमान्यद्यहं स्वतंत्रराज्यस्थापनार्थमकारिष्यम् तदाऽनायासेन तत्सिद्धमभविष्यत्. नष्टेऽपि तस्मिन् पुनरपि अमुं विजापुराधिपं सेवितुमागतः. अत्रापि कर्णाटकविभागे महान्ति युद्धानि युध्वा स्वबान्धवानां स्वातंत्र्यमपहृत्य तान् पारतंत्र्यनरकेऽपातयम्. सर्वस्याऽपि अस्य पापस्येदं फलं संवृत्तं. अस्तु. यशस्वी मम पुत्रः शिवराजः सर्वथा योग्यमेव करोति. मम हि पलिताशिरसो मृत्युना केशेषु गृहीतस्य दुःखेन किं ! यावद्धि आयुस्तावद्दुःखं तु भोक्तव्यमेव. अन्ते च यदि प्राणव्ययेन जनानां भारतवासिनां स्वातंत्र्येच्छा प्रवर्धेत तदा तदपि महत् फलमित्यत्र न संशयः. सर्वथेदानीं परमात्मनि विश्वस्य स्थातव्यमिति उचितमिति.

(४)

घोरे सर्वतो निबिडान्धकारव्याप्ते वातागमनार्थं स्थापितालपच्छिद्रे कारागारे क्रुद्धेन विजापुराधीशेन स्थापितान् स्वपितृचरणानाकर्ण्य पितृभक्तः शिवराजः परं चिन्तातुरोऽभवत्. माता जिजादेवी तु प्रकटं किमपि कर्तुमसमर्था हृदय एवासह्येन दुःखेन पीडिता पुटपाकावस्थामन्वभूत्. अथ शिवराजः स्वपितृचरणानां प्राणसंकटं समुपस्थितमवलोक्य विचारयामास. अस्मिन् समये

राजनीतिसमाचरणं विना नान्यच्छरणं. दुर्बलैर्मध्यमबलपीडितैः स्वपीडापरिहारायोत्तमबलवानाश्रणीय इति खलु राजनीतिः. स चोत्तमबलशाली विज्ञप्तो मध्यमबलं बलादेव ततो निवर्तयति. अस्मिन् समये सर्वेऽपि आर्यवंशजा दुर्बला एव. बलाढ्येषु सर्वेषु यवनराज्येषु दिल्लीश्वरः सत्यमेव श्रेष्ठः. स हि कृत्स्नमार्यावर्तं तथा हिमालयस्य परस्ताद्वर्तमानान् भूविभागान् शासत् कोशेन सैन्येन च सर्वानतिरिच्यते.

स चास्मिन् समये दक्षिणापथवर्तीनि यवनराज्यानि आक्रमितुमिच्छति. तद्यद्यस्मिन् समये स सेवकभावं प्रकटीकृत्य पितृचरणप्राणरक्षणार्थं प्रार्थ्यते चेत्तदाऽवश्यमेव विजापुराधीशमस्मान्नृशंसात्कर्मणो व्युपरमार्थमाज्ञापयेत्. यद्यपि विजापुराधिप आत्मानं स्वतंत्रं मन्यमानो दिल्लीश्वरं द्वेष्टि तथापि स मध्यमबलो दिल्लीश्वराद्बिभेति. तावतैवास्माकं कार्यसिद्धिः स्यात्. वस्तुतस्तु स्वतंत्रराज्यस्थापनार्थं प्रवृत्ता वयं न कस्यापि सेवकास्तथापि अस्मिन् समये विनयमवलंब्यैव कार्यसिद्धिः कर्तव्येति. विचार्य चेत्थं स चतुरः शिवराजो दिल्लीश्वरं पत्रद्वारेण स्वपितृचरणसंकटनिवारणार्थं विज्ञापयामास. तच्च पत्रं सारतो यथा. सर्वैश्वर्यसंपन्ना दिल्लीश्वराः! साम्प्रतं यूयमेव भारतवर्षस्य कृत्स्नस्य स्वामिनः. इमे च विजापुराधिपप्रभृतयो यवनाधिपा युष्मदधीनाएव. अहं च युष्माकं सेवको मदीयं पैतृकं भूविभागं परिपालयन् सुखेन निवसामि. मदीये भूविभागे बहून् राजद्रोहिणो वीक्ष्य तच्छासनार्थं तथा युष्मच्छासनस्थिरीकरणार्थं

ञ कानिचिद्दुर्गाणि संस्कृत्य स्वल्पां सेनां स्थापितवान्. तदेत-
न्यथा मन्यमानो विजापुराधीशो मदीयं पितरं कारागारे स्थापयित्वा
रूरेण प्राणदण्डेन दण्डयितुमिच्छति. सम्प्रति च मदीयेनानेन कर्मणा
म वृद्धः पिता कारागारेऽसह्यानि दुःखान्यनुभवति. तद्विज्ञापयामि
युष्मान् यदि मदीयमिदं कर्मान्यथा न तदा मदीयं पितरं रक्षितुं
वेजापुराधीशमाज्ञापयतेति. अहं चावसरे स्मृत्वा कस्मिन्नपि कार्य-
विशेषे योजनीय इति.

तदानीं च दिल्लीश्वरः शहाजहाननामा मोंगलकुलसंभूत एवा-
सीत्. स हि सम्यग्ज्ञातश्रीशहाजिराजपराक्रमः शिवराजस्याऽपि परा-
क्रमकृत्यानि शृण्वन् तावुभावपि स्वसेवकौ विधातुमुत्सुकोऽभीचकार
श्रीशिवराजस्येमामभ्यर्थनां. आज्ञापयच्च दूतमुखेन विजापुराधीशं
'सर्वथा रक्षणीयः शहाजिराजः. इतथा महदनिष्टं भवेत्' इति. तथैव
महता संतोषेण पारितोषिकं विसर्ज्य शिवराजाय सर्वं वृत्तं निवेदया-
मास च. विजापुराधीशस्तु राजनीतावपि अप्रतिहतं शिवराजस्य
चातुर्यं वीक्ष्य मूढमतिः प्रबलस्य दिल्लीश्वरस्याज्ञामुल्लंघयितुमसमर्थः
कथमपि शहाजिराजान् मोचयितुं कारागाराधिपमाज्ञापयितुं मनश्चक्रे.

वाचकाः? श्रीशिवराजो न केवलं शूर एवासीत् किंतु स राजनी-
तिप्रवीणोऽपि. यद्यपि बहवः शूरास्तथाऽन्ये च राजनीतिपटवो लोके
दृश्यन्ते परन्तु तदेतदुभयमपि यत्र संमीलितमास्ते तादृशो जनोऽ-

तीव दुर्लभः. अतएव श्रीशिवराजमद्वितीयमेव मन्यन्ते सर्वेऽपि विद्वांसः. अस्मिन् समये शिवराजेन न केवलं पितृचरणा एव मोचिताः किन्तु विजापुरराज्याच्चतुर्थांशग्रहणाज्ञाऽपि तेन लब्धा. अस्तु.

(५)

एवं सार्वभौमकल्पस्य दिल्लीश्वरस्य नियोगं लब्ध्वा दुःखाकुलोऽपि अगतिकतया शीघ्रमेव शहाजिराजांस्तस्माद्यमागारादिव यातनागारान्निष्कासयितुं स्वामात्यमाज्ञापयामास. सोऽपि सत्वरमेव तथा चक्रे. प्रकृतिकुटिलो विजापुराधीशोऽन्तर्द्वेषेण ज्वलन् शहाजिराजान् स्वराज्धान्यामेव स्थातुमाज्ञापयत्. शहाजिराजाश्च ज्ञातयवनराजस्वभावाः स्वदेशं गन्तुमत्युत्सुका आसंस्तथापि पुनरनिष्टाद्भवशंकया तत्रैव तस्थुः. विजापुरस्थानि श्रीशहाजिराजस्य मित्राणि तान्निष्कारणं दण्डितानवलोक्य प्रथममेव दुःखाकुलानि पुत्रचातुर्येण मुक्तांस्तान् स्वदेशं गमयितुं प्रायतन्त.

अत्रान्तरे कर्णाटकविभागे राजद्रोहः समुदभवत्. स च दावानल इव वेगेन प्रसरन् सर्वमपि विजापुरराज्यं बाधितुं प्रारभत. ततो भीतो विजापुराधीशस्तस्य शान्तये स्वसामन्तानपृच्छत्. ते च तस्य शान्तये श्रीशहाजिराजा एव समर्था नान्य इत्यवदन्. अगत्या च सोऽनिच्छन्नपि कर्णाटकविभागं गन्तुं श्रीशहाजीराजाननुमुमुदे.

स्मिन्नेव क्षणे मुमुक्षुर्मृत्युलोकमिव तद्यवनराजसांनिध्यं विहाय श्री-
हाजिराजाः कर्णाटकविभागं यातुं कृतप्रस्थाना निभृतं दूतमुखेन
शेवराज 'यदि त्वं मम सत्यमेव पुत्रस्तदाऽस्य मित्रद्रोहिणो
घोरपडेकुलकलंकस्य बाजिसामन्तस्य प्राणानपहृत्य सन्तोषं जनय'
इति समाज्ञापयत्.

श्रीशिवराजश्च मान्यानां तातपादानामिमामाज्ञां शिरसा स्वीकृत्य बिजापुराधीशस्य कृपां तथा महदैश्वर्यं संपाद्य प्रत्यागतं विश्वासघातकं तं बाजिसामन्तं चारमुखेन विज्ञाय स्वसैनिकैः समं निर्गतः श्येन इव पक्षिणं रात्रावकस्मात् कण्ठे तं जीवग्राहं जग्राह. निवेद्य च तस्मै तदीयं पापकृत्यं तं स्वखड्गबलिं चक्रे. अन्यांश्च तत्सहायान् सर्वानपि जघान. सर्वं तदीयं कोशं च स्वराजधानीमानिनाय. अस्मिन् समये शिवराजः सहस्रादपि परं मानवानवधीत्.

वाचकाः? यद्यत्र केचन वदेयुः- बाजिसामन्तस्यात्र को वाऽपराधः? तेन खलु केवलं राजाज्ञा परिपालितेति तदा तान् प्रति वक्तव्यं, शिवराजस्यात्र कोऽवाऽपराधः? स तु केवलं पित्राज्ञां पालयामासेति. नहि राजाज्ञैव प्रमाणं न पित्राज्ञेति शास्त्राणि वदन्ति. एवं दूरीकृत्य

पितृसंकटं शिवराजश्चत्वारि वर्षाणि तूष्णींस्थित्वा गमयामास. अन्यथा पुनरुद्वेजितो विजापुराधिपस्तातचरणान् पीडयेदिति. अथ च स्वयं स्वीकृतसेवकभावः स दिल्लीश्वरराज्येऽपि न किंचित्कर्तुं पारयामास. एतेषु चतुर्षु वर्षेषु शिवराजः संपादितमेव भूविभागं सम्यग्व्यवस्थापयांचक्रे. विजापुराधीशोऽपि शिवराजं शौर्यचातुर्यसमन्वितं समवलोक्य भीतो नाकलद्दायत.

(१० विजापुराधिपतिना समं संग्रामाः)

१ चन्द्रावमोरेसामन्तस्य शासनं.

२ अफझुलखानवधः.

३ शिद्धीजोहारसेनापतेर्युक्त्यापराजयः

४ विजापुराधीशस्य स्वयमागमनम्.

५ फलाभावःसंधिःस्वातंत्र्यप्राप्तिः.

(१)

एतं युक्त्या पितृसंकटं निवार्य तदाज्ञां च समनुष्ठाय कृतस्व-राज्यव्यवस्थः शिवराजः पुनरपि स्वराज्यमर्यादां वर्धयितुमियेष. अत्रान्तरे दिल्लीश्वरः शहाजहानः केनापि कारणेन क्रुद्धः स्वपुत्रं 'अवरंगजेब' नामानं विजापुरराज्याक्रमणाय महता सैन्येन समं प्रेषयामास. तदिदं वृत्तमाकर्ण्य राजनीतिचतुरः शिवराजः स्वसामर्थ्य-वर्धनस्यायमेव समय इति मनसिकृत्वा दिल्लीश्वरं 'यदि विजापुर-राज्यान्तर्गतं सर्वं कोंकणविभागं मह्यं दास्यथ तदाऽहं विजापुरराज्या-क्रमणे युष्मान् साहाय्ययिष्यामि' इति विज्ञापयामास. दिल्लीश्वरोऽपि शिवराजस्य बलं समुद्रवेलेव वर्धमानमश्रेयस्करं मन्यमानस्तदीयां

विज्ञप्तिं नांगीचकार. शिवराजश्च तेन निभृतं कुपितः सर्वे यवनाः समाना इति दृढं मनसि कुर्वाणो यथेच्छं 'जुन्नर, अहंमदनगर'-नामनी नगरे दिल्लीश्वरराज्यान्तर्गते विलुण्ठ्य विपुलां सम्पदमाजहार. विजापुराधिपराज्यान्तर्गतं महाविभागमाक्रम्य प्रभूतं धनमाहृत्य स्वसेनां वर्धयामास. अत्रान्तरेऽकस्माद्विजापुराधीशो दिल्लीश्वरेण समं संधिमकरोत्. तेन शिवराजः पुनरपि विनयमवलंब्य दिल्लीश्वरं स्वापराधक्षमार्थमयाचत. सोऽपि आर्यावर्ते समुपस्थितं राजद्रोहं शमयितुं त्वरया गच्छन्न चकार मनसि शिवराजकर्माणि.

दिल्लीश्वरमार्यावर्तव्यवस्थाममवलोक्य विजापुराधीशः प्रथमं शिवराजमुन्मूलयितुं मनो विदधे. यतो दिल्लीश्वरः शिवाजिना समं मिलित्वा मदीयं राज्यं लीलया स्वायत्तीकरिष्यतीति स परं संदिग्धे.

अथास्मिन् कर्माणि बाजिशामराजनामा कश्चन राजपुरुषो विजापुराधीशेन नियुक्तो निभृतं शिवराजं बन्दीकर्तुमिच्छन् चन्द्रावमोरेनाम्ना जावळीविभागस्वामिना विजापुराधीशसामन्तेन सह संमंत्र्य तस्मिन् प्रदेशे कृतवसतिः शिवराजागमनं प्रतिपालयामास. तदानीं शिवराजो महाडविभाग आसीत्. स चेमं वृत्तान्तं सर्वतः संचरतां स्वचाराणां मुखान्निशम्याऽकस्मात् स्वयमेवागत्य तं बाजिशामराजं श्येनः शशमिव समाक्रम्य जिगाय. स तु तथापराभूतः कथमपि स्वप्राणान् गृहीत्वा राजधानीं ययौ.

एनं विजयं लब्ध्वा शिवराजो मनस्यकरोत्—अनेन खलु अस्मत्सजातीयेन जावळीस्वामिना चन्द्ररावेण मदीयः शत्रुरानीतः! अयं च भूयोभूयः कर्तव्यं बोधितोऽपि न तत् स्वीकुरुते. अस्य शासनं विना कृत्स्नोऽपि सह्याचलविभागः स्थिरो न भवेत्. तस्मादयं पुनरपि एकदा बोधनीयः. यदि अनुकूलो भवेत्तदा वरमेव. अन्यथा राजनीतिमनुसृत्य वर्तनीयमिति. विचार्य चैवं स शिवराजः स्वस्य विश्वासनिधीभूतौ द्वौ सेवकावाहूय जगाद—युवामितो गत्वा तं चन्द्ररावं पश्यतम्. मार्गे च कर्नाचित्पृष्टौ शिवराजस्य कृते चन्द्रारावस्य कन्यां याचितुं गच्छाव इति वदतम्. तत्र च गत्वा स यथा मत्पक्ष्यः स्यात्तथा प्रायतेथाम्. अथ यदि स तथाभवितुं नांगीकुर्यात्तदा निभृतं तमाक्रम्य हतम्. अहं च ससैन्यं समीप एव तिष्ठन् युवाभ्यां सावधानेन द्रष्टव्य इति. तौ च तदाज्ञां स्वीकृत्य निर्गतौ मार्गे तथैव वर्तमानौ निर्विघ्नं जावळीग्रामं गत्वा तस्य चन्द्रारावस्य प्रासादेऽतिष्ठताम्.

अथ यदा भूयोभूयस्ताभ्यां बोधितोऽपि स चन्द्रारावः स्वाग्रहं नामुंचत्तदा तौ निभृतमेकान्ते च्छुरिकया तं प्रहृत्य महता जवेन समीपस्थं ससैन्यं शिवराजममीलताम्. शिवराजश्च तदानीमेव जावळीग्राममाक्रम्य योद्धुं प्रारभत. तस्य चन्द्रारावस्य हणमंतरावनामा मंत्री स्वामिपुत्रसमेतश्चिरं युयुधे, परन्तु शीघ्रमेव शिवराजस्तं हतवीर्यं व्यधात्.

एवमेवान्यो बांदलनामा देशमुख आत्मानं विजापुराधिपसेवकं मन्यमानः शिवराजायादुह्यत्. तमपि अनेनैव विधिना नामशेष विधाय प्रकटीकृतालौकिकस्वामिभक्तिं नररत्नं वीरशिरोमणिं प्रभु कुलभूषणं तदीयममात्यं वाजिप्रभुं स्ववशं व्यधात्. इत्थं कृत्स्नं कोंकणविभागं स्ववशं विधाय बलं वर्धयामास.

(२)

विजापुराधीशश्च क्रमेण प्रबलीभवन्तं शिवराजमाकर्ण्य चिन्तातुरस्तस्य शासने कृत्स्नं स्वबलमुपयोक्तुं कृतनिश्चयो महतीं स्वसामन्तानां सभामकरोत्. मुख्यस्य सिंहासनाधीश्वरस्य बालत्वेन तदीया मातैव कृत्स्नं राज्यकार्यमपश्यत्. सा तु शिवराजस्य प्रतापकृत्यानि श्रुत्वा नितान्तं क्रुद्धा सर्पिणीव सर्वान् राजपुरुषानुद्दिश्येदमभाषत-

सभ्याः ? राजपुरुषाः ? स राजद्रोही शहाजिराजस्य पुत्र शिवाजिः स्ववंशपरंपराप्राप्तां राज्यनिष्ठां त्यक्त्वाऽहर्निशं राज्यमस्माकं पीडयति. स्वपितरमपि न मन्यते. अस्माभिश्च प्रेषितान् सेनापतीन् विजित्य सांप्रतं बलिष्ठः संवृत्तोऽस्मत्प्रजा लुण्ठति. अधुना च तमुपेक्षानर्हं मन्यमाना वयं तं नामशेषं विधातुमिच्छामः. तत् को वा तं जीवग्राहं गृहीत्वा वा हत्वा वा राज्यपीडां दूरीकर्तुमिच्छति? अहं च सर्वथा तं साहाय्ययिष्यामीति.

समाकर्ण्य चेदं कोपपरातमानसाया राजमातुः कठोरं भाषणं सर्वे तत्रत्या राजपुरुषाः शूराअपि शिवराजप्रतापश्रवणभीता नोदति-